उत्तरो मारुतः स्निग्धो मृदुर्मधुर एवच ।
कषायानुरसः शीतो दोषाणां चाऽप्रकोपणः ॥
तस्माच्च प्रकृतिस्थानां क्लेदनो वलबर्धनः ।
क्षीणक्षयविषार्तानां विशेषेण तु पूजितः ॥

( सु० सू० अ० २० )

## वायुप्रवाहः

वायुषु सदा गतिर्भवति । यतो विकृतवायुः सत्वरं दूरीभवति शुद्धवायुश्चायाति । यो दूषितवायुरस्माभिर्निःश्वासद्वारा वहिः क्रियते स स्वच्छवातेनाऽसङ्गम्य तनुर्जायतेऽतोऽस्माकं न हानि

---

टिप्पणी

( २ ) उत्कुथ्यमानजन्तुवनस्पतिभ्यो दुर्गन्धिविषात्मक पदार्थाः ( कर्वनद्वि-ओषितप्रभृतिगैसाः ) निः सरन्ति । पशवस्तु त्वक्फुप्फुसेभ्यः १२ ॥ कलातः २० कलायावद्वाष्पमहोरात्रे नि सारयन्ति । वनस्पतिभ्योऽपि वहुवाष्पानि नि सरन्ति ।

( ३ ) समित्कोकिलदीपकादीनां प्रज्वालनेन यो धूमो निःसरति तेनाऽपि वायुर्दुष्यति । प्रस्तरकोकिलप्रज्वालनात् कर्वन-'कर्वन - द्वि - ओषित' - कर्वनैकौषित गन्धक-गन्धकाम्ल-कर्वन-द्विगन्धित-जलादीन्युत्पद्यन्ते । काष्ठस्य, समित्कोकिलानां च प्रज्वालनात्तु कर्वन-द्विओषितो वाष्पश्चेत्येवोत्पद्यते । दीपकेषु मृत्तैलज्वालनादधिकमात्रया कर्वनओषितो जलवाष्पं धूमरजांसि चोत्पद्यन्ते । विद्युत्प्रकाशो न कमपि दोषमुत्पादयति ।

( ४ ) दुर्गन्धिवाष्पाणि यानि मलमूत्रादिवाहिप्रणालीभ्यो निःसरन्ति तेषु नत्रजनः प्रतिशतम् ५४ ओषजनः प्रतिशतं २ कर्वन-द्वि-ओषितः प्रतिशतं ४ उपलभ्यन्ते । तथा तत्र सङ्क्रामकरोगोत्पादकजीवाणवोऽपि प्राप्यन्ते ।

करः सम्पद्यते। तदेतत् प्राकृतिकवायुप्रवाहोत्पत्तेः कारणं शैत्यमौष्ण्यञ्च वर्त्तते। तथा शैत्यौष्ण्ययोर्हेतुः—सूर्यप्रकाशोऽस्ति। औष्ण्याद्वायुः तनुतां लघुतां च लभते। स चोपरिगच्छति। तत्स्थाने शुद्धः शीतो वायुरायाति। एवमेव वायुषु प्राकृतिकगतिर्नित्यं भवति। गृहेषु एवमेव वायुः प्रवहति। श्वासनिःश्वा

---

टिप्पणी

(५) रोगोत्पादककीटाणुभ्योऽतिरिक्ता वायुपूड्डीयमानाः धूलिपरागखनिजद्रव्यताम्रलौहकांस्यादीनां सूक्ष्मकणाः त्वग्रोमनखपूयष्ठीवनादिसूक्ष्मांशा रोमान्तिकामसूरिकाविस्फोटकादीनां-शुष्कचर्माणि च प्राप्यन्ते। प्रायेणैते भिन्नभिन्नस्थलेषूपलभ्यन्ते यथाचिकित्सालयादौ रोगोत्पादककीटाणवः, लौहकारादीनामापणौ लौहताम्रादीनां कणा इत्यादि।

अतः सदा स्वास्थ्यरक्षार्थमुपायः कार्यः। अर्थात्तत्तत्स्थानेषु मुखनासिके वस्त्रेणाच्छाद्य कार्यं करणीयम्। अशनवेलायां च सम्यङ्मुखहस्तपादान् प्रक्षाल्य भोक्तव्यमित्यादि।

प्रकृत्या वायुशुद्धिः—पूर्वोक्तवर्णनैः स्पष्टं सिध्यति यत्कर्बनद्वि ओषितादिवायव्यपदार्थाः प्रतिक्षणमुत्पद्यन्ते। ये हि वायुं दूषयन्ति। परन्तु यद्येवमेव सततं दूषितवायुः तिष्ठेत्तर्हि सर्वेऽपि म्रियेरन् तस्य श्वासकर्मानर्हत्वात्। किन्त्वेवन्न भवति। प्रकृत्यैवैतदर्थमुत्तमः प्रवन्धः कृतः, अर्थाद्वायोः कर्बन-द्वि-ओषितं वनस्पतयो गृह्णन्ति, ओषजनं च स्वतो निष्कासयन्ति यत्सेवनात्स्वास्थ्यरक्षा भवति।

तथा चायमोषजनो दुर्गन्धिभिरैन्द्रियिकपदार्थैः मिलित्वा तान् कर्बनिकाम्लामोनियादिषु विपरिणामयति। एते नव्यपदार्था वायुषु विस्तृता एतावन्तः तनवो भवन्ति येषामाघ्राणेन

साभ्यामन्यैर्ज्वलनहेतुभिर्वाऽऽभ्यन्तरिकवायुरुष्णः तथा तनुर्भूत्वोपरि गच्छति। तथा तत्स्थाने बाह्यःशुद्धशीतवायुरागच्छति। यदि बाह्याभ्यन्तरिकवातयोरुष्णतायामान्तर्य्यं न स्यात्तर्हि एवम्भूता गतिर्नोत्पद्येत। यद्यप्येवं प्रकृतौ वायुशुद्धिप्रबन्धोऽस्ति तथापि बृहन्नगरेषु तथा सदनेषु सम्यग्वायुशुद्धिकार्यं न भवति। अतस्तत्राशुद्धवायुनिष्कासनार्थं शुद्धवायुसञ्चारार्थं कश्चिद् उपायः कर्तुं युज्यते। स च वातप्रविचार इत्युच्यते।

## वातप्रविचारः *

निर्बाधमभितः शुद्धवायुवहनमित्यस्याभिप्रायः। स च द्विविधः वहिर्वातप्रविचारः अन्तर्वातप्रविचारश्चेति। वहिर्वातप्रविचारस्यायमभिप्रायःयन्नगरग्रामादिष्वभितः वायोः सञ्चरणम्। तदर्थं निम्नाङ्किता उपाया अवलम्बनीयाः—

( १ ) निवासगृहाणि पृथक्पृथगेकपङ्क्तौ भवितव्यानि।

( २ ) प्रत्येक सदनानां चतुर्दिक्षु विवृतं स्थानं भवितव्यम्। असम्भवे तदग्रेऽवश्यं स्यात्। गृहमध्येऽङ्गणमप्यवश्यं कार्यम्।

( ३ ) राजमार्गवीथिकाः सुविस्तृता भवितव्याः।

( ४ ) हर्म्याण्यतिसमुन्नतानि कार्याणि। तेषामुच्चता मार्गविस्तारानुकूला स्यात्।

---

टिप्पणी

हानिर्न भवति केषाञ्चिदपिजन्तूनाम्। अतोऽतिरिक्तं घनाम्ब्वपि स्वेन सह वायव्यपदार्थान् पृथिव्यांपातयति।

दूषितवातजा रोगा :--- दूषितवातसेवनाच्छिरःशूलारोचकालस्यपाण्डुकासप्रतिश्यायश्वासमलावरोधाग्निमान्द्यकर्णनाददौर्बल्यादयो गदा जायन्ते।

* Ventilation.

( ५ ) नगरेष्वनेकान्युद्यानानि तथा विवृतस्थानानि कार्याणि ।

( ६ ) सरकेषु सदा जलं प्रकिरणीयं यतो धूलिर्नोड्डीयेत ।

( ७ ) मलसङ्करादीनि समयोपर्युत्थाप्य मार्गवीथिका नित्यं स्वच्छीकार्याः ।

( ८ ) नाल्यो निरन्तरं स्वच्छीकृत्यजलेन प्रक्षाल्याः ।

( ९ ) कार्यालयाः नगरेभ्यो वहिर्दूरे निर्माप्याः नगरेषु न कदापि निर्माप्याः । यतस्तत्रत्या धूमा धूल्यादयश्चवहिर्निर्गच्छेयुः ।

एवं सदा नगरेषु वसतिषु शुद्धवायुप्रविचरणं दूषितवायु निर्गमनञ्च भवति येन तत्रत्यजनाः सदा स्वास्थ्यमनुवर्तन्ते ।

अन्तर्वातप्रविचारः—इत्यस्य, गृहाभ्यन्तरे शुद्धवायोः प्रविचरणमशुद्धवायोश्च निर्गमनमित्यभिप्रायः । नगरग्रामादिषु सम्यग्वाह्यवातप्रविचारेण तत्रत्यगृहाभ्यन्तरेष्वपि सम्यग्वात प्रविचारो भवति । गृहेषु प्रतिकुटीरमभितो गवाक्षजालकादीनि वातायनानि कार्याणि ।

Indira Gandhi National
Centre for the Arts

शुद्धवायोरभीष्टराशिः *—प्रत्येक पुरुषाणां प्रतिहोरं प्रायः

---

टिप्पणी

यन्मध्यमामध्यगतं हि पर्व, तद्द्वादशं स्फीतमिति प्रसिद्धम् ।
स्फीतेन सार्धैकमितेन हस्तः, मानाय बोध्यः पुरुषो वयस्थः ॥

पर्व Inch स्फीतम् Feet

* एकसहस्रघनस्फीतघनफलकस्थले प्रतिहोरं त्रिवारं वायुः परिवर्त्यते तदा त्रिसहस्रघनस्फीतशुद्धवातः समुपलभ्यते । यत्र विवृतस्थलेसम्यग्वातप्रविचरणं भवति तत्र प्रतिहोरंपञ्चषड्वारं वायुः परिवर्तते । अतएव तत्र प्रतिमनुष्यं ६०० घन स्फीतस्थानमेव पर्याप्तं भवति ।

३००० घनस्फीत ‡ शुद्धवातस्यावश्यकता भवति येन सुस्वास्थ्यं जायते ।

योऽधिकं परिश्रमते तदर्थं ततोऽप्यधिकशुद्धवायुराशिर्भवितव्यः । स्त्रीणामपि ३००० घनस्फीतपरिमितः, बालकानांतु २००० घनस्फीतपरिमितः शुद्धवायुरावश्यकः ।

मनुष्यवत्पशूनामपि शुद्धवायोरावश्यकता भवति । पशवोऽपि शुद्धवायुसमाक्रान्तशालासु स्वस्था निवसन्ति । अतस्तेषां वाताभीष्टराशिज्ञानार्थं तच्छरीरभारो ज्ञातव्यः । साधारण नियमोऽयं यदर्धसेटक ( Pound ) शरीरभारं प्रति २५ घन स्फीतवायुर्भवितव्य इति ।

स्वस्थपुरुषापेक्षया रुग्णपुरुषेभ्योऽधिकशुद्धवायुराशिर्भवितव्यः । यतः स्वेदादिकं तेषामधिकं निःसरति । साधारण

---

टिप्पणी

‡ वायुमण्डलस्य सहस्रभागे कर्वनद्विओषितस्य मात्रा ·६ पर्यन्तानाऽस्वस्थकरी भवति । किन्तुततोऽधिकाऽस्वास्थ्यकरी सञ्जायते । तद्वायौ दौर्गन्ध्यमरतिश्चानुभूयते । विशुद्धवायौ क० द्वि० ओ० मात्रा १००० भागे ·४ भवति । अतः १००० घनस्फीतवायौ क० ओ२ यदि ·२ घनस्फीताधिकः स्यात्तर्हि सा तस्य ग्राह्यमर्यादा मन्यते । साधारणतः प्रत्येकमनुष्यः एकहोरायां ·६ घनस्फीतं क० ओ२ परित्यजति । अतोनिम्नाङ्कितरीत्या ज्ञातुं शक्यते यदेकजनार्थं प्रतिहोरमेतावच्छुद्धवायोरावश्यकता भवतीति--

$$\frac{१००० \times ·६}{·२} = ३००० \text{ घनस्फीतः}$$

अधिकपरिश्रमकर्तारोऽधिकं क० ओ२ परित्यजन्ति । तदनुसारेण तेषामपीत्थमेव ज्ञातव्यम् ।

रोगिणां ३०५० घनस्फीतवायुरावश्यकः । संक्रामकरोगिभ्यः शीतलान्त्रिकज्वराद्याक्रान्तेभ्यस्तु ततोऽप्यधिको भवितव्यः ।

## आवश्यकवातप्रविचरणार्थं प्रतिव्यक्त्य-भीष्टस्थानम् ❀

एकजननिवासार्थमभीष्टस्थानम् १००० घनस्फीतघनफलकं भवितव्यम् । यच्च दशस्फीतायतदशस्फीतविस्तृतदशस्फीतोन्नत गृहरूपेणोपलभ्यते । गृहेषु द्वाराणि, वातयनानि तथा जालकानि पर्याप्तानि भवितव्यानि । तानि च यथासम्भवमन्यान्यसन्मुखानि स्युः । यतो वायोर्गमनागमने सौकर्यंस्यात् । श्वासनि श्वासाभ्यां ज्वलनेन च वायुरुष्णो लघुश्च भूत्वोपरि गच्छत्यतो दूषितोष्ण वायोर्निष्कासनार्थं गृहवितानसंविधेऽनेके गवाक्षाः कार्याः । एवम्भूतैर्गवाक्षैर्दूषितवायुर्बहिर्निर्गच्छति तथा शुद्धवायुर्वातायनमार्गेण समागच्छति ।

ग्रीष्मकालेऽतिप्रवातप्रखरतापाभ्यामात्मरक्षार्थं द्वारवातायनान्यनावृतानि क्रियन्ते । तदानीं शुद्धवायुप्राप्त्यर्थमशुद्धवायुनिर्गमनार्थञ्चोपायद्वयं विधेयं भवति ।

अन्तःपथो वहिष्पथश्चेति । अन्तःपथेन शुद्धो वायुर्गृहा-

---

टिप्पणी

❀ भगवतासुश्रुतेन सूतिकागारनिर्माणार्थमेकसूतिकार्थ मष्टहस्तायतं चतुर्हस्तविस्तृत गृह लिखितम् । सम्भवतो यदि अष्टहस्तपरिमितमौन्नत्यमपि मन्येत चेत्तर्हि १२ × १२ × ६ = ८६४ घनस्फीतघनस्थानमेकस्त्र्यर्थमेकपुरुषार्थं वा सुश्रुतमतेऽपि सिध्यति यदाधुनिकवैद्यमतसान्निध्यं द्योतयति ।

भ्यन्तरे समायाति । वहिष्पथेनाशुद्धो वायुर्वहिर्निर्गच्छति । एवं गृहेषु सुखं वातप्रविचरणं भवति ।

अन्तःपथः—अयमधिष्ठानात् ५—६

स्फीतोच्चैर्भवितव्यः प्रवाताक्रमणप्रखरतापेभ्यो रक्षार्थमस्य मुखं वितानं ( छत ) प्रति कार्यम् । तथाऽस्य क्षेत्रफलं २४ वर्गपर्वात्मकमर्थादस्यायामः ६ पर्वात्मको विस्तारः ४ पर्वपरिमितः कार्यः । अनेन गृहाभ्यन्तरे आगमनशीलवायोर्गतिः प्रतिसार्धद्विविपलं ( 1 Second ) ५ स्फीततोऽधिका न भवति । यदि सा गतिः २—३ स्फीतपरिमिता प्रतिसार्धद्विविपलं स्यात्तर्हि वरं भवेत् ।

अधिकोपयोगिकरणार्थमस्याकारः शङ्कुवत्कार्यः । तस्य विस्तृतमुखं गृहं प्रति, सङ्कुचितमुखं तु वहिः कार्यम् ।

वहिष्पथ :— अयमशुद्धवायुनिष्कासनार्थं निर्मीयते । आकारेणाऽन्तःपथेन सदृश एव कार्यः । विताने वितानसविधे वा भवितव्यः यतोऽशुद्धवायुरुष्णो भूत्वोपरि च गत्वा वहिर्निर्गच्छत्यत उपर्येव नियुज्यते । यदि तत्सकाशं एव प्रदीपस्तिष्ठेत्तर्हि अशुद्धवातो निर्बाधं सत्वरं वहिर्गच्छेत । अन्तःपथवहिष्पथौ सदा धूलितो रणक्षीयौ यतस्तयोः छिद्रमावृतं मा भूत् ।

## वायुशुद्धिः

कर्पूरदेवदारुधूपचन्दनश्रीवासः सर्जागुरुनिम्बसोमराजिकापत्रगन्धकगुग्गुलराजिकाश्वेतसर्षपसाकल्यादिहवनद्रव्याणामग्नौ हवनेन वायुर्विशुध्यति ।

## सभास्थानादिकप्रमाणम्

सभाभवनरङ्गभूम्यादौ प्रतिव्यक्ति अल्पस्थानस्य २५०

३०० घनस्फीतघनफलकस्यैवाऽऽवश्यकता भवति। यत एतानि स्थानान्यत्यल्पकालार्थं सेव्यन्ते। चिकित्सालये यत्रातुरा निवसन्ति यत्रहि ऐन्द्रियिकपदार्थाः जीवाणवश्चोपलभ्यन्ते तत्र प्रत्यातुरं न्यूनातिन्यूनं १२०० घनस्फीतस्थानं भवितव्यम्। तथा तलस्य क्षेत्रफलं तस्य द्वादशांशवर्गस्फीतं स्यात्। कारागारे प्रत्येकाभियुक्तार्थं न्यूनातिन्यूनं यत्स्थानं दीयते तत् ६४८ घनस्फीतपरिमितं भवति। तथाऽधिष्ठानस्य क्षेत्रफल ३६ वर्गस्फीतं भवति। कारागारातुरालये प्रत्यातुरं ९०० घनस्फीतस्थानं दीयते। तथा तलस्य क्षेत्रफलं ५४ वर्गस्फीतं भवति। एकान्तवासदण्डाय १००० घनस्फीतस्थान दीयते तथाऽधिष्ठानस्य क्षेत्रफलं ७५ वर्गस्फीतं क्रियते।

## वासस्थानम्

स्वास्थ्यदृष्ट्या निवासार्थं साभूमिः * श्रेष्ठा भवति यत् किञ्चिन्निम्नगा, शुष्का, कोष्णा तथा वनस्पत्युत्पत्तियोग्या स्यात्। वासगृहं शुष्ककिञ्चिच्छिद्रमयभूम्यामर्थात्तनुसिकतादियुक्तायां निर्मातव्यम्। यतस्तत्रत्यं जलं निर्बाधं दूरे निर्गच्छेदेकत्र माभूत्। एतदर्थं चिक्कणमृन्मयभूमिर्न कदाप्यनुमोदनीया आर्द्रशीतलजलावरोधवतीत्वात्।

## वास्तुशास्त्रोक्ताग्राह्यभूमिः

देवानां तु द्विजातीनां चतुरश्रायताः श्रुताः।
वास्त्वाकृतिरनिन्द्या [illegible]वाकप्रत्यग्दिक्समुन्नता॥

---

* भूमिः—श्वेतारक्तकपीत कृष्ण वसुधा स्वादुःकटुस्तिक्तकाः,
काषायाघृतशोणितान्नमदिरागन्धाः शुभा विप्रतः।
(मुहूर्तमार्तण्डः)

हयेभवेणुवीणाब्धिदुन्दुभिध्वनिसंयुता ।
पुन्नागजातिपुष्पाब्जधान्यपाटलगन्धकैः ॥
पशुगन्धसमा श्रेष्ठा सर्वबीजप्ररोहिणी ।
एकवर्णा घना स्निग्धा सुखसंस्पर्शनान्विता ॥
बिल्वो निम्बश्च निर्गुण्डी पिण्डितः सप्तपर्णकः ।
सहकारश्च षड्वृक्षैरारूढा या समस्थला ॥
निष्कपाला निरुपला कृमिवल्मीकवर्जिता ।
अस्थिवर्ज्या न सुषिरा तनुवालुकसंयुता ॥
अङ्गारैर्वृक्षमूलैश्च शूलैश्चापि पृथग्विधैः ।
पङ्कसङ्करकूपैश्च दारुभिर्लोष्टकैरपि ॥
शर्कराभिर्युक्ता या भस्माद्यैस्तु तुषैरपि ।
सा शुभा सर्ववर्णानां सर्वसम्पत्करी धरा ॥
दध्याज्यमधुगन्धा च तैलासृग्गन्धिका च या ।
श्वेतासृक्पीतकृष्णा हयगजनिनदा षड्रसा चैकवर्णा ।
गोधान्याम्भोजगन्धोपलतुषरहिताऽवाक्प्रतीच्युन्नता या ॥
पूर्वोदग्वारिसारा वरसुरभिसमा शूलहीनास्थिवर्ज्या ।
सा भूमिः सर्वयोग्या कणदररहिता सम्मताद्यैर्मुनीन्द्रैः ॥
( मयमते अ० ३ )

अन्यच्च—मनसश्चक्षुषो यत्र सन्तोषो जायते भुवि ।
तस्यां कार्यं गृहं सर्वैरिति गर्गादिसम्मतम् ॥
[ गृहभूषणे ]

## अग्राह्यभूमिः

शवमीनपक्षिगन्धा या सा धरा निन्दिता वरैः ।
सभाचैत्यसमीपस्था नृपमन्दिरसंश्रिता ॥
देवालयसमीपस्था कण्टकिद्रुमसंयुता ।

वृत्तत्रिकोणविषमा वज्राभा कच्छपोन्नता ॥
चाण्डालत्रासगच्छाया चर्मकारालयाश्रिता ।

( म० म० अ० ३ )

गृहनिर्माणकाले एतत्सदा विचार्यं यद् गृहं विवृतस्थले स्यात्तत्रत्यो वायुः शुद्धः स्यान्मलमूत्रप्रणाली च भूपृष्ठे न भवेत् । गर्तरजकघट्टनालकसमीपस्थलेष्वपि गृहनिर्माणार्थं स्थानमुपयोगि न भवति । यतः सजीवपदार्थानामुत्कुथनादिकारणैर्दूषितवायुस्तत्रैकत्रीभूय तिष्ठति ।

वस्तुत आवासार्थं श्रेष्ठतमा भूमिः पर्वतशिखरमथवोपत्यका भवति । यदीदं स्थानं छायामयं स्यात्तर्ह्यतिवरम् । वृहत्स्थलेषु आवासाः यथासम्भवं दूरे दूरे तथोच्चस्थाने निर्माप्याः । यतो वार्षिकं भूमितलस्थं च जलं सुखं प्रोह्य निर्गच्छेत् ।*

नैते कदाप्यशोभभानजाङ्गलोषरभूमावगभीरतडागसरसोरथवा कस्यचिद्बद्धजलाशयस्य सविधे निर्माप्याः । समीपस्थमलसङ्करभूमीनां धूमादिविशिष्टकार्यालयानां श्मशानस्य कृषिक्षेत्राणाञ्च स्थितिरपि हानिकरी भवति ।

नगरेषु ग्रामेषु च गृहं नैवम्भूतासु भूमिषु निर्मेयं या मलसङ्करैर्गर्तानापूर्य निर्मिताः स्युः ।

भूमिष्ठमुदकं भूपृष्ठात्सप्तहस्तगाम्भीर्यान्न्यूनं मा भूत । गृहस्य चतुर्दिक्षु विवृता वनस्पतयः स्युर्यतः प्रवातादस्योष्णातायामधिकभेदो न भवेत् ।

गृहमभितः एतावद्विवृतं स्थानमपि स्याद्यस्य क्षेत्रफलमस्योत्सेधविस्तारसमं स्याद्यतो गृहे सुखं वातप्रविचारो भवेत्

---

*—पूर्वपश्चिमतो दैर्घ्यं सपादं दक्षिणोत्तरम् ।
शुभावहं गृहचोर्ध्वं सूर्यावद्ध न सौख्यदम् ॥

( गृ० भू० )

तथा सम्यक्सूर्यरश्मय आगच्छेयुः। गृहस्य द्वारं‡ यस्यां दिशिस्याद् गृहोच्चता तद्दिग्वीथिकाविस्तारतोऽधिका न स्यात्। कस्यामप्यवस्थायां गृहं ४६ हस्तपरिमाणादधिकमुन्नतं न भवेत्। गृहद्वारं यथासम्भवं प्राच्यामुदीच्यां दिशि वा कार्यं यतः प्रातः सूर्यकराः समापतेयुः।

शयनागारो यथासम्भवं गृहस्य कोष्ठे द्वितीयखण्डे स्यात्। तस्य च द्वारमुत्तरपूर्वयोः कार्यम्। गृहस्याभितो भूमिषु प्रस्तरेष्टकाद्यन्यतमैः कुट्टिमं ( फर्श ) कार्यम्। तदग्रेच हरितशष्पाच्छादितमेकं भूखण्डं स्यात्। तच्छष्पानां कर्तनं नियमतः सदा करणीयम्। ग्रामेषु गृहसन्निकट एव पर्याप्तपानीयप्राप्त्यर्थं कूप आवश्यको भवति। किन्त्वेतत्सदा विचार्यं यत्तत्रकूपजल दूषिकाः मलमूत्रादिवंाहिन्यः प्रणाल्यो न भवेयुः।

## भित्तिमूलम् ( नींव )

एतावद् दृढं भवितव्यं यद्गृहस्यभारं सम्यक् प्रसहेत। अस्योपरि पाषाणखण्डानामन्येषां वाऽप्रवेश्यपदार्थानांस्तरेणैकं तलं रचनीयं यन्न्यूनातिन्यूनंसार्द्धहस्तपरिमितमुन्नतं स्यात्तथा चतुर्दिक्षुभित्तेःमूलादष्टाङ्गुलपरिमितमग्रे विस्तृतं स्यात्।

भूमेरार्द्रताया भूमिगतवायोश्च रक्षार्थमुपपीठं * ( कुर्सी )

---

‡—गेहोच्चस्य चतुर्थांशो द्विगुणो द्वारउच्छ्रयः।

( गृ० भू० )

*—अधिष्ठानस्य चाधस्तादुपपीठं प्रयोजयेत्।
रक्षार्थमुन्नतार्थञ्च शोभार्थं तत्प्रवक्ष्यते॥

( म० म० अ० १३ )

निर्माप्यं यद्धि भूपृष्ठात् पर्याप्तमुच्चैः स्यात्। यदि गृहं स्तम्भोपरि निर्मीयेत तर्हि अत्युत्तमं स्याद् यतः पूर्वोक्तलाभातिरिक्तं तदधोऽपि सम्यग्वातप्रविचरणं भवेदिति।

## भित्तिः

सामान्यत इष्टिकाभिः प्रस्तरैः, समिधा, मृत्तिकया च विरच्यते। इष्टिकाः छिद्रमयीत्वाज्जलं सम्यगाकर्षन्ति, एवं मृतिकाऽपि। तथा वायुरप्यावारपारे गच्छत्यतोऽस्याउभयदिशि प्रास्तरः कार्यः। प्रत्यब्दमेकदावश्यं सुधाधौता कार्या। मृद्भित्तिरपि श्रेष्ठमृत्तिकागोमयादिभिः प्रलेप्या। भित्तोरधस्तलसन्निहितभागानांनिर्माणावसरे तत्संस्कारकद्रव्येषु कश्चिदप्रवेश्य पदार्थः सम्मेलनीयो यतो भूम्यार्द्रता छिद्रद्वारा न प्रविशेत्। द्वितलकगृहेषु द्वितीयखण्डीयापेक्षया प्रथमखण्डीया भित्तिः स्थूलतरा कार्या।

Indira Gandhi National Centre for the Arts

## द्वारवातायनानि

प्रत्येककुटीरेषुएकं द्वारं तथैकं वातायनं भवितव्यम्। द्वारं न्यूनातिन्यूनं हस्तचतुष्टयोन्नतं द्विहस्तविस्तृतं च कार्यम्। वातायनं तद्दिशि भवितव्यं यद्दिशा वायुरागच्छति। तत्क्षेत्रफलं कुटीरक्षेत्रफलस्य दशमांश भाव्यम्।

## तलम् ( फर्श )

एतदप्रवेश्यपदार्थैं रचनीयं यद्धि सुखं निर्मलीकर्तुं शक्यं स्यात्। प्रायः प्रस्तरेष्टिकाखर्परसुधाशर्करादिभिर्निर्मीयते।

## गृहवितानम् ( छत )

द्विविधं भवति समतलं निम्नगञ्चेति। समतलवितानेऽपि किञ्चिन्निम्नगत्वमवश्यं करणीयं यतो वार्षिकं जलं प्रोह्याऽधोनिर्गच्छेत्। निम्नगवितानिर्माणार्थं खर्पराणि, कासदर्भशरादि-खलविशेषाः, लौहपत्रादीनि च प्रयुज्यन्ते येषु सीतावत्पङ्क्तयः स्युः।

पर्णखलशष्पादीनां वितानं ( छप्पर ) यद्यपि शीतलं, शुष्कं तथा प्रकाशवातागमनार्हं स्वास्थ्याय हितकरञ्च भवति। तथापि तत्र सर्पपत्त्रिकीटादयः स्वगृहं कृत्वा निवसन्ति तथा अग्नेरपि-भयं विशेषेण भवति। लौहादीनां वितानं तु ग्रीष्मकालेऽत्युष्णं जायते।

वितानेष्वभितः सूक्ष्मप्रणाल्यः कार्याः। यत्र जलमेकत्री-भवितुं शक्नुयात। तथा प्रणालिका अपि स्युःयैः तज्जलं सद्योऽधो निर्गच्छेत्।

प्रणालकनिर्माणे एतदवधार्यं यत्ते भित्तौसंल्लग्ना न भवेयुः। किन्त्वग्रे निर्गता भवेयुः अन्यथा भित्तिराद्रतां प्राप्य सत्वरं नष्टा भवितुं शक्नोति। वितानसन्निकटे दूषितवायुनिष्कासनार्थं गवाक्षाः प्रकाशागमनार्थं प्रकाशकाश्च भवितव्याः।

## महानसम्

भोजनगृहं प्रस्त्राववर्चोगृहयोः सन्निहिते न निर्माप्यम्।
तथैवम्प्रबन्धः कार्यो यथा धूमः सर्वगृहेषु न प्रसरेत्।
धूमनिर्गमनार्थं महानसवितानेऽनेके छिद्राः कार्याः।
अग्नेय्यां दिशिकर्तव्यमावासस्य महानसम्।
गवाक्षजालमार्गाढ्यमर्धभित्त्युपलेपितम्॥

चुल्ली तत्र प्रकर्तव्या पूर्वपश्चिममायता । ❀

( चे० कु० )

## वर्चोगृहं प्रस्रावगृहञ्च

वर्चःप्रस्रावयोर्गृहे सदनस्यैकतटे निर्माप्ये। तयोरधस्तले भित्तयश्चाप्रवेश्यपदार्थैः सीमेण्टादिभिः कार्याः। सर्वदा च स्वच्छीकार्ये यतो दौर्गन्ध्यंनाऽऽगच्छेत्।

## सूतिकागारम्

अरिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु विल्वन्यग्रोधतिन्दुकभल्लातकनिर्मितं सर्वागारं यथासंख्यं तन्मयपर्यङ्कमुपलिप्तभित्तिं सुविभक्तपरिच्छदं . प्राग्द्वारं दक्षिणद्वारं वाष्टहस्तायातं चतुर्हस्तविस्तृतं रक्षामङ्गल सम्पन्नं विधेयम्।

Indira Gandhi National
Centre for the Arts

( सु० शा० अ० १० )

## कुमारागारम्

वास्तुविद्याकुशलः प्रशस्तं रम्यमतमस्कं निवातं प्रवातैकदेशं दृढमपगतश्वापदपशुदंष्ट्रिमूषिकपतंगं सुसंविभक्तसलिलोदूखलमूत्रवर्चः स्थानस्नानभूमिमहानसमृतुसुखं यथर्तुशयनासनास्तरण-

---

अन्यानिगृहाणि

*—स्नानादिपाकशयनास्त्रभुजे च धान्य
भाण्डारदैवतगृहा दिशि पूर्वतः स्युः।
तन्मध्यतस्तु मथनाज्यपुरीषविद्याऽ—
भ्यासाख्यरोदनरतौषधसर्वधाम ॥

( गृ० भू० )

संपन्नं कुर्यात्तथा सुविहितरक्षाविधानबलिमङ्गलहोमप्रायश्चित्तं शुचिवृद्धवैद्यानुरक्तजनसंपूर्णमितिकुमारागारविधिः ॥

( च० शा० अ० ८ )

वार्षिकं जलं गृहसमीपे नैकत्रीभवेदेतदर्थं तस्य चतुर्दिक्षु पाषाणेष्टकादिभिः कुट्टिमं कार्यम् । तथा तत्रत्यजल निर्गमनार्थमभितः प्रणाली निर्माप्या यद्द्वारोदकं नागरिकवृहन्नालायामन्यत्र वा सुदूरे निर्गच्छेत् ।

## गृहभूशुद्धिः

भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा ।
सेकादुल्लेखनाल्लेपाद् गृहं मार्जनलेपनात् ॥

( या० व० )

## गोशालाऽश्वशाले

इमे गृहाभ्यन्तरे गृहातिसन्निकटे वा न निर्माप्ये तत्रत्यमल मूत्रयोर्भूमौप्रवेशाद्गृहिणामस्वास्थ्यकरत्वात् । आवासान्न्यूनाति-न्यूनं शतस्फीतदूरतो निर्माप्ये । तदभितः पञ्चदशस्फीतविस्तृत स्थानं रिक्तं कार्यम् । एतयोरुच्चता द्वादशस्फीततो न्यूना न कार्या । एकगवे द्वादश*स्फीतायामंस्फीतचतुष्टयविस्तृतं स्थानं विधेयम् । एकाश्वार्थन्तु द्वादशस्फीतायामं षट्स्फीतविस्तृतं स्थानं करणीयम् । एतयोरधिष्ठानं समीपभूमितलादेकस्फीतोच्चकं पाषाणशर्करासीमेण्टादिनिर्मितं निम्नगञ्च कर्तव्यम् । एका प्रणाली कार्या यतो मूत्रादिकं तद्द्वारा मलपथे गत्वा सुदूरे निर्ग-

*—केचिद्विद्वांस एकपशवे ८ स्फीतायामं ४ स्फीतविस्तृतं तथैका श्वाय ९ स्फीतायामं ५ स्फीतविस्तृतं स्थानं मन्यन्ते । तथाऽऽवासात् २० स्फीतदूरेऽपि पशुशालाश्वशाले निर्माप्य इति कथयन्ति ।

च्छेदथवा ततो न्यूनातिन्यूनतो दशस्फीतदूरे सञ्चयनगर्तमेकं कार्यं यत्र मूत्रादिकमेकत्रीभवेत्। ततश्च संगृह्य सुदूरे ग्रामाद्बहिर्निक्षिपेत् । सूर्यप्रकाशवातागमनार्थमपि सुप्रबन्धः कार्यः । वितानमपि वर्षाघर्माक्रमणसंरक्षकं स्यात् । निर्मलीकरणार्थमपि सर्वदा ध्यानं देयम्। प्रत्यहं वारद्वयं जलेन मार्जनीयम्। गोमयादिकं सर्वदा वहिष्कार्यम्। वुषालय आवासेभ्यो दूरे पशुशालातः पृथङ् निर्मातव्यः । पशुशालासु दिनचतुष्टयान्ताधिकंभक्ष्यं वुषादिकं न स्थाप्यम् । पशुभ्यो निर्मलं जलं पानार्थं देयम्। पशुभृत्याः पशुशालावितानोपरि शयनार्थं न कदाप्याज्ञाप्याः।

## जात्याद्यनुसारेण ग्रामादौ वासस्थाननिर्माणम्

गोशाला दक्षिणनश्चोत्तरदेशे तु पुष्पवाटी स्यात्
पूर्वद्वारे वापि पश्चिमतस्तापसावासम् ॥
सर्वत्रैव जलाशयमिष्टंवापी च कूपं च।
वैश्यादेर्दक्षिणतः* परितः सदनंतु शूद्राणाम्॥
प्राच्यां वाप्युत्तरतो गेहं कुर्यात्कुलालानाम्।
तत्रैव नापितानामन्यत्कर्मोपयुक्तानाम् ॥
मत्स्योपजीविनां स्याद्वासो वायव्यदेशे तु।
पश्चिमदेशे मांसैरुपवृत्तीनां निवासः स्यात्॥
तैलोपजीविनां चैवोत्तरदेशे गृहश्रेणिः।
ग्रामात्किञ्चिद्दूरे पावकदेशेऽथवा वायौ ॥
वासः स्यात्स्थपतीनां शेषाणां तत्र कर्तव्यम्।
तस्मात्किञ्चिद्दूरे रजकादीनां निवासः स्यात्॥
चाण्डालकुटीराणि पूर्वायां क्रोशमात्रे तु।

---

*—वैश्यक्षत्रियविप्राणां निवासस्थानं दक्षिणपूर्वोत्तर दिक्षु क्रमेण बोद्धव्यम्।

प्रागुत्तरदिशि दण्डैः ✽ पञ्चशतैः स्याच्छ्रवावासम् ॥

( मयमते अ० ९ )

## नगरम्

राष्ट्रस्य मध्यभागे सज्जनवहुले नदीसमीपे च ।
नगरं केवलमथवा राजगृहोपेतराजधानी वा ॥
दिक्षु चतुर्द्वारयुतं गोपुरयुक्तं तु सालाढ्यम् ।
क्रयविक्रयकैर्युक्तं सर्वजनावाससङ्कीर्णम् ॥
सर्वसुरालयसहितं नगरमिदं केवलं प्रोक्तम् ।
प्रत्यगुदग्दिशि गहना परितः साला वहिः सपांसुचया ॥
परितः परिखा वाह्ये शिविरयुताऽनेकमुखरक्षा ।
पूर्वायां दक्षिणतश्चाभिमुखा राजवलयुक्ता ॥
उन्नतगोपुरयुक्ता नानाविधमालिकोपेता ।
सर्वसुरालयसहिता नानागणिकान्विता वहूद्याना ॥
हस्त्यश्वरथपदातिवहुमुख्या सर्वजनयुक्ता ।
द्वारोपद्वारयुताऽभ्यन्तरतोऽनेकजनवासा ॥
या नृपवेश्मसमेता सा कथिता राजधानीति ।

( म० म० अ० १० )

## दुर्गाणि

गिरिवनजलपङ्केरिणदैवतमिश्राणि सप्त दुर्गाणि ।
गिरिमध्यं गिरिपार्श्वं गिरिशिखरं पार्वतं दुर्गम् ॥
अजलं तरुवनगहनं वनदुर्गतदुभयं तु मिश्रं स्यात् ।
दैवं तु सहजदुर्गं पङ्कयुतं पङ्कदुर्गं स्यात् ॥

---

✽—यवोदरैरङ्गुलमष्ट संख्यैर्हस्तोङ्गुलैः षड् गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः,

( लीलावती )

नद्यब्धिपरिवृतं यज्जलदुर्गं निर्वनोदमिरिणं स्यात् ।
अक्षयजलान्नशस्त्रं ह्यतिविपुलोत्तुङ्गघनसालम् ॥
सर्वं हि दुर्गजालं सप्राकारं त्वनेकमुखरन्ध्रम् ।
वहिरुदकं रहितवनं छन्नपथं दुष्प्रवेशं च ॥
गोपुरमण्डपयुक्तं सोपानच्छन्नमच्छिन्नम् ।
द्वाराणि मण्डपसभाशाला काराणि कार्याणि ॥
प्रकाराश्चेष्टकया द्वादशहस्तोच्छ्रिताहीनाः ।
उत्सेधार्धविशाला मूले भित्तिः ससञ्चारा* ॥
सर्वस्याभ्यन्तरतः पांसुचयोपर्यनेकयन्त्रयुतम् ।
परितः परिखोपेतं पांसुचयेसंहताट्टालम् ॥
परितः शिविरोपेतं नानाजनवाससङ्कीर्णम् ।
नृपभवनसमोपेतंहस्त्यश्वरथपदातिवहुमुख्यम् ॥
धान्यैस्तैलैः क्षारैः सलवणभैषज्यगन्धविषम् ।
लोहाङ्गारस्नायुविषाणवेणिवन्धनैर्युक्तम् ॥
तृणचर्मकारयुक्तं सवल्कलं सारदारुयुतम् ।
दुर्गं दुर्गममुक्तं दुर्लङ्घ्यं दुरवगाहं च ।
रक्षार्थं च जयार्थं ह्यरिभिरभेद्यं च दुर्गमिष्टं स्यात् ।

( म० म० अ० १० )

## पण्यवीथिका

सार्वजनिकविपणिः प्रधानमार्गतटे भवितव्या यत्र हि सर्वे जनाः सुखं गन्तुं शक्नुयुः । तन्मुखं सरकदिश्येव स्यात् । गोधूमादिधान्यानां मिष्टपक्वान्नानां च विपणिरपि तन्मार्गतट एव स्यात् । खाद्यवस्तूनि मिष्टपक्वान्नादीन्याच्छादितकाचपात्रे

*—गुप्तमार्ग ( सुरंग ) सहितेत्यर्थः ।

रक्षितव्यानि। प्रधानमार्गीयद्वारद्वयातिरिक्तं शेषदिशोरपि द्वारं कार्यम्। फलशाकादिविपणेः पृथगसम्बद्धाच मांसविपणिर्भवेत्। अस्या नैर्मल्यार्थं विशेषध्यानं देयम्। प्रत्येकापणाग्रे गमनागमनार्थं न्यूनातिन्यूनं हस्तचतुष्टयविस्तृतो मार्गः स्यात्।

"मयमुनिलिखितं नगरान्तरापणकविधानम्"

परितो रथपथयुक्तं मध्ये वणिजां गृहश्रेणी।
तद्दक्षिणतः पार्श्वे गेहं स्यात्तन्तुवायानाम्॥
उत्तरतस्तद्वासावलिकं स्याचक्रिकाणां तु।
कर्मोपजीविनां स्याद्वासो रथपथ्यनेकानाम॥
ब्रह्मावृतपथमेकं तत्रान्तरापणं कार्यम्।
ताम्बूलादिफलं च प्रोक्तं सारान्वितं द्रव्यम्॥
ईशानादिमहेन्द्रद्वारान्तकं चान्तरापणकम्।
तत्रैव मत्स्यमांसं शुष्कं शाकञ्च विज्ञेयम्॥
महेन्द्राद्यग्न्यन्तं भक्ष्यं भोज्यं च निर्दिष्टम्।
अग्न्यादिक्षतगृहपर्यन्तं च तत्र भाण्डानि॥
तस्मान्निर्ऋतिपदान्तं कन्सादिकमत्र विज्ञेयम्।
स्यात्पुष्पदन्तभागान्तं पितृभागादिशस्त्राणि॥
तस्मात्समीरणान्तं तण्डुलधान्यादिकं च कटम्।
स्याद्भल्लाटपदान्तं वाय्वादि वस्त्रकादीनाम्।
तत्रैव लवणादि द्रव्यं तैलादि भैषज्यम्॥
तस्मादीशपदान्तं गन्धं पुष्पादिकं विहितम।
एवं नवान्तरापणमुदितं परितो मध्ये तु॥
अभ्यन्तरगतमार्गेष्वथ रत्नं हाटकं वस्त्रम्।
परितः सर्वजनालयमुदितं किञ्चित्ततो दूरे॥
नगराद्द्विशतं दण्डं नीत्वा प्राच्यांतु वाऽऽग्नेय्याम्।
चाण्डालकुटीराणि तत्रैव तु कोलिकानां च॥

अस्मिन् सर्वमनुक्तं ग्रामे यथा तथा विहितम्।

( मयमते अ० १० )

गोधूमादिमिष्टान्नादिविक्रयगृहेषु प्रकाशवातागमनार्थं गवाक्षाः भित्तौ विताने च कार्याः। अधिष्ठानादिकं दृढ तथाऽप्रवेश्यवस्तुभिः सुरचितं स्यात्। आपणाग्रे विरामदा निर्माप्याः। यतो ग्राहकाः सुखं प्राप्नुयुः। अत्र जलस्य मलपथस्य च सुप्रबन्धः कार्यः। प्रत्येकापणानां चतुर्दिक्ष्वेका प्रणाली भवेत्। या विपणेर्बाह्यबृहन्मलपथे संगता स्यात्। दुर्गन्धिपदार्थमलसङ्कराद्यर्थं सन्निहितोचितस्थानेषु साच्छादनानि पात्राणि रक्षितव्यानि। तानि प्रतिदिवसं वारद्वयं रिक्तानि कर्तव्यानि। मार्गात्किञ्चिद्दूरे आपणिकानां मलमूत्रोत्सर्जनस्थानान्यपि स्युः। येषां शुद्धिर्दिवा वारद्वयमवश्यं कार्या। आपणानां, तत्सन्मुखभूमीनां, राजमार्गस्य, वीथिकानाञ्च स्वच्छता प्रत्यहं निरन्तरं विधेया। विपणेर्निरीक्षा नगरसभायाः स्वास्थ्यनिरीक्षकाधीना स्यात्।

जीर्णाः शीर्णाः कथमपि स्वास्थ्यहानिकारकाः पदार्था विपणौ विक्रयार्थं नाऽऽज्ञा देया तदधिकारिभिः।

## विद्यालयः

निष्प्रत्यूह एकान्तस्थाने भूपृष्ठादेकस्फीतोच्चैरायताकारमतमस्कं प्रवातैकदेशं वातायनादिसम्पन्नमभितो निम्नगतलं विद्याभवनं निर्मातव्यम्। तस्य परित एका प्रणाली कार्या या बृहन्मलपथे संगता स्यात्। विद्यालयमध्य एकं समितिभवनं कार्यं तथाऽन्यानि गृहाणि एकपङ्क्तौ भवेयुः। गृहाग्रे विरामदाऽवश्यं स्यात्। प्रतिच्छात्रं द्वादशवर्गस्फीतस्थानमावश्यकम्। प्राय एकं गृहं ३० स्फीतायामं २० स्फीतविस्तृतं १४ स्फीतोन्नतञ्च-

विधेयम् । अधिष्ठानमप्रवेश्यपदार्थैः प्रस्तरेष्टकादिभिर्निर्माप्यम् । गृहवितानमपि दृढं रचनीयम् । उपविश्याध्ययनार्थं मञ्चिकाः, पुस्तकरक्षणार्थं च मेजकानि स्युः । नित्यं विद्यालयः स्वच्छीकार्यः ।

अर्थाभावादादर्शविद्यालयनिर्माणाशक्तौ घनच्छायवृक्षतले स्फीतैकोन्नतःसुविस्तृतश्चत्वरो निर्माप्यः तदुपर्यध्यापनीया विद्यार्थिनः मञ्चिकाद्यभावे कटस्योपयोग आसनार्थं कार्यः । अस्यामवस्थायां लिखनपठनसमय एकजान्वधः पातयित्वा द्वितीयजानून्नती कृत्योपविशेत् । तदुपरि पुस्तकं संरक्ष्य लिखेत्पठेद्वा । एवं पृष्ठवंशास्थीनि सरलानि तिष्ठन्ति तथा वक्षस उदरस्य चावयवा अनुचितभारतः संरक्षिता भवन्ति । विद्यालये पेयजलस्य मलमूत्रत्यागस्थानस्य च यथाविधि प्रबन्धः कार्यः ।

## छात्रावासः

छात्रावासः समस्तगृहगुणसम्पन्नो विधेयः । अस्य द्वारमुत्तरदिशि दक्षिणदिशि वा कार्यम् । अस्य प्रत्येकं कुटीरमेवं स्याद् यत्प्रत्येकच्छात्रार्थं ५० वर्गस्फीतस्थानमागच्छेत् । प्रतिच्छात्रमेका काष्ठपट्टी ( तख्ता ), एका मञ्चिका ( कुर्सी ), एकं मेजकम् ( Table ) तथाचैका कुड्यागारिका ( एल्मारी ) पुस्तकरक्षणार्थं प्रदेयाः । प्रकाशस्योत्तमः प्रबन्धः कार्यः । हिन्दू यवनेशायिनां भोजनाजयः पृथक्पृथक् कार्यः । विद्यालय सीम्नि स एव आपणिको मिष्टान्नादिविक्रयार्थमागन्तुं शक्नुयाद् यो विद्यालयाधिकारिणा वैद्येन तद्वस्तूनि परीक्ष्याज्ञापितः स्यात् ।

## विद्यार्थिनां स्वास्थ्योपदेशः

प्रत्येकाध्यापका अवगतस्वस्थवृत्ता भवेयुः । यतस्ते छात्रानु-

पदिश्य सदाचाराभ्यासिनः कर्तुं शक्नुयुः। छात्रैः प्रत्येककार्यं सदा नियमतः कार्यम्। शरीरावयवा वस्त्राणि च निरन्तरं सुशुद्धान्येव भवेयुः। तमाखुसिगरेटप्रभृतीनां केषाञ्चिदपि मादक-द्रव्याणां सेवनं न कदापि कार्यम्। बालविवाहोऽवरोधनीयः विवाहिताविवाहितच्छात्रौ नैकत्र निवसेताम्। छात्राणां स्वास्थ्य-परीक्षा सदा कार्या। संक्रामकरोगाक्रान्तच्छात्रस्तावद्विद्यालयात्पृथक् कार्यो यावत्प्रमाणितं न स्याद् यदयं नीरुजः संक्रमणभयरहित इति। छात्रैर्व्यायामो विविधः निरन्तरं कार्यः। ब्रह्मचर्यधारणार्थं सदा प्रयतनीयम्। व्यायाम शाला, कंदुकक्रीडनक्षेत्रञ्चावश्यं भवेत्।

## चिकित्सालयः

चिकित्सालयस्य स्थानं समुन्नतं शुद्धं रोगिसमागमन सुखञ्च भवेत्।

अतो यथा सम्भवं राजमार्गे तत्सन्निकटे वा स्वास्थ्यप्रदे विवृतस्थले कुर्यात्। वस्तुतो विंशति रोगिणां विष्टरार्थमेकैकडं स्थानमुचितम्। परन्त्वशक्तौ चत्वारिंशद्रोगिविष्टरेभ्तोऽधिकं विष्टरं न कदापि विष्टरणीयम्। आतुरालय एकतलकः श्रेष्ठतर। अधिकस्थानाऽभावे द्वितलकोऽपि निर्मातुं शक्यते। एवं सति रोगिपरीक्षागृहं कार्यालयादिकं च निम्नतलक एव स्यात्। आतुर-गृहञ्चोपरितलके कुर्यात्।

साधारणतश्चिकित्सालयस्य त्रयः खण्डा भवन्ति शासकखण्डो वाह्यरोगिखण्ड आन्तरिकरोगिखण्डश्चेति।

## शासकखण्डः

अत्र प्राणाचार्यस्य तत्सहायकानां च कर्मचारिणां गृहाणि, भोजनालयः, वस्तुगृहादीनि च गण्यन्ते। परिचारिकाणांतु वास-

स्थानानि प्रायः पृथग्भवन्ति। एकगृहाद् द्वितीयगृहपर्यन्तं सुदृढ़मार्गो भवेत्। ततःकिञ्चिद्दूरे रजक गृहं निर्मातव्यम्। यत्र वस्त्रप्रक्षालनार्थमेको जलाशयः ( पुष्करिणी ) कतिपयशिलाखण्डाश्च स्युः। तत्र च लघुकुटीरद्वयंतथैका खर्परटिनान्यतराच्छादितविरामदा विवृता स्यात्। यत्रैकस्मिन् कुटीरे मलिनवस्त्राणि, द्वितीये च प्रक्षालितवस्त्राणि निधातव्यानि। वर्षाकाले विरामदायां वस्त्राणि शोषणीयानि।

## वाह्यरोगिखण्डः

अत्र वातायनादिगुणसम्पन्नं स्वच्छं, रोगिव्यवस्थाद्युल्लेखागारं, स्त्रीपुंसोरुपवेशनार्थं पृथक्पृथक् स्थानं, भैषज्यवितरणगृहं, व्रणोपचारभवनञ्च पृथक्पृथक् कार्यम्। रोगिणां विशेषपरीक्षाणार्थं तत्सुप्रकाशितगृहस्यैकभागे जवनिकातिरस्कृतैका काष्ठमयी समुन्नता शय्या भवेत्। शस्त्रक्रियाभवनञ्च तत्थाने स्याद्यत्र पर्याप्तप्रकाशः समागच्छेत्, धूलिः कथमपिनाऽऽगन्तुं शक्नुयात्। उत्तरदक्षिणदिशोर्भित्तीनां कपाटा वातायनानि च काचमयानि स्युर्यतः सम्यक् प्रकाशः तिष्ठेत्। परन्त्वातुरोपरि शस्त्रचिकित्सकोपरि च स्पष्टसूर्यकरापातो न भवेदेवमुपायः सदा कार्यः। अस्य तलं श्लक्ष्णकठिनकान्तिमत्प्रस्तरेण ( यथा मर्मराख्येन ) निर्मितं स्यात्। तत्सन्निहितभित्तयो न्यूनातिन्यूनतः पञ्चस्फीतोच्चतान्ताः सुश्लक्ष्णाः कान्तिमत्यश्च कार्याः। अस्मिन्नागारे कोऽप्यानावृतशरीरः सन्नाऽऽगन्तुं प्राप्ताज्ञो भवेत्। अत्रैका सोपानपरम्परा [ Gallery ] भवितव्या। यस्याः सोपानानि वहिर्विरामदादिशि गच्छेयुर्यतो ये विद्यार्थिनः सेवायां न संलग्नाःसन्ति तेऽत्राऽऽगत्य शस्त्रक्रियांसमवलोकेरन्

शवगृहं शवपरीक्षाभवनश्चातुरालयादुपयुक्तदूरे निर्मापणीयम्।

## आन्तरिकरोगिखण्डः

आतुरालयस्य रोगिगृहाण्यायताकाराणि रचनीयानि। येषां प्रतिदिक्षु विरामदा भवेयुः। रोगिगृहयोर्मध्ये न्यूनातिन्यूनं तदौन्नत्याद्द्विगुणमान्तर्य्यं स्यात्। पुरुषेभ्यः स्त्रीभ्यश्च पृथक्पृथग्रोगिगृहं भवेत्। वस्तुतः प्रत्येकरोगिगृहं २४-३० स्फीतविस्तृतं, १२-१५ स्फीत समुन्नतं, तावच्चायतंकार्य्यंयावत्प्रत्येकरोगिणाधिष्ठानस्य १२ वर्गस्फीतस्थानंवायोश्च १२०० घनस्फीतस्थानं लभ्येत। विशेषतः तदेदमत्यावश्यकं यदा रोगिगृहे विद्यार्थिनः परिचारिकाश्च कार्यं कुर्युः। न्यूनातिन्यूनतःप्रतिरोगि स्थानं ६० वर्गस्फीतमितं ८१० घन स्फीतमितञ्चावश्यं स्यात्। अत्र वातायनानि मिथः सम्मुखे कार्य्याणि। तानि च रीतिलौहान्यतरसूक्ष्मतन्तुजालोपगुम्फितानि स्युः। यतस्तत्र मक्षिकामशकादयो नाऽऽगन्तुं शक्नुयुः। रोगिगृहेषुसुखं वातप्रविचरणार्थं प्रायो वातायनानि अनावृतानिस्युः। सम्मुखस्थत्वाद्वातप्रवाहः सदा तिष्ठति। परन्त्वेतावत्तयाप्येवं प्रबन्धः कार्यः यच्छुद्धनवीनवायुः ( अन्तःपथ ) नलिकाद्वारा गृहे समागच्छेत्। अशुद्धवायुश्च वितानसन्निहित प्रकाशकगवाक्षद्वारा वहिर्गच्छेदिति। विशेषतो वर्षर्तौ शीतकाले च यदा वातायनान्यावृतानि भवन्ति तदाऽयम्प्रबन्धो बहूपयोगी। यानलिका शुद्धनवीनवाताऽऽगमनार्थं निर्मीयन्ते ता विष्टरतोऽधःस्था भवेयुः। यतो वाताक्रमणं सहसा माभूत्। सम्भवतः प्रतिरोगं गृहं पृथक् पृथग्भवेत्। अशक्तौ त्वसंक्रामकरोगिण एकगृहेऽपि रक्ष्यन्ते प्रायेण। प्रत्येकरोगिगृहे २४—३२ शय्या भवेयुः। परन्तु मुख्यगृहे चत्वारिंशद्रोगिणामपि निवा-

सोऽनिन्द्यः। शय्याशिरोभागा भित्तिदिशि स्थाप्याः। विष्टाराणा मुभयोः पंक्त्योर्मध्ये न्यूनातिन्यूनं ११ स्फीतविस्तृत एको मार्गः स्यात्। वातायनयोर्मध्यस्थले प्रत्येकशय्या स्थापनीया। अस्य स्थलस्य विस्तारो न्यूनातिन्यूनं शय्याविस्तारापेक्षयैकस्फीता धिको भवेत्। अत्र शय्याद्वयमपि स्थापयितुं शक्यते तत्र चेन्मिथः स्फीतत्रयस्यान्तर्य्यं स्यात्। उत्तरभारत इत्यप्यावश्यकं यच्छीतकाल आतुरगृहस्योष्णीकरणार्थं कश्चित्प्रबन्धः क्रियेत। एतदर्थं हसन्तिकानामुपयोगोऽतिश्रेष्ठः। उष्णकाले शीतलता प्रापणार्थं विद्युद्व्यजनं वस्त्रादिव्यजनापेक्षया श्रेष्ठतरम्। मुख्य रोगिगृहात् किञ्चिद्दूरे एककोणे स्त्रीभ्यः पुरुषेभ्यश्चपृथक्पृथक् पुरीषोत्सर्जनगृहं स्नानशाला च रचनीया। तत्र दशस्फीतायत श्चैकोमार्गः समवितानः मुख्यरोगिगृहसम्बद्धः कार्यः।

## परिचारिका*गृहम्

इदं मुख्यगृहसम्बद्धैककोणे स्यात्। अत्र चैकं वातायनं रोगिनिरीक्षणार्थं रोगिगृहसम्मुखं कार्यम्।

## शवगृहं शवपरीक्षाभवनञ्च

एतदर्थमेवम्भूतं स्थानं निर्णेतव्यं यद्रोगिगृहेभ्य उपयुक्त-दूरस्थं भवेत्।

## संक्रामकरोगिगृहम्

आतुरालयात् पृथक् पर्याप्तदूरे भवनमेकं निर्मातव्यं यत्संक्रामकरोगिणां निवासार्थं स्यात्। तत्र पृथक्पृथग्रोगानु

---

* केचिद्विद्वांसः परिचारिकानियोजनमनुचितं मन्यन्ते तत्स्थाने परिचारका एव स्युः।

Indira Gandhi National Centre for the Arts

सारेण पृथक्पृथग्गृहं कार्यम्। विसूचिकादिरोगार्ताः सन्दिग्धरोगिणश्च तत्रैव रक्षणीयाः।

## विशिष्टगृहाणि

धनिका, ये आतुरालये पृथक् स्थित्वाऽऽरोग्यकामाः, तेभ्यो भवेयुः। तत्र निवासकुटीरपाकशालास्नानशालाशौचालयादीनां पूर्णप्रबन्धः कार्यः। एतान्येकभूखण्ड एवनिर्मातव्यानि। परन्तु गृहद्वयमध्ये भित्तिव्यवधानमवश्यं स्यात्। साधारणरोगिगृहादेतानि पृथक्स्युः।

## अधिष्ठानादीनि

रोगिगृहशस्त्रक्रियाभवनशवभवनादिषु तलमेवम्भूतं श्लक्ष्णमीषन्निम्नगञ्च कार्यं यज्जलं गृहसम्बद्धनालिकायां सुखंनिर्गच्छेत्। अधिष्टानं सर्वतः समं भवेत्। तच्च मर्मराख्यप्रस्तरादिभिरप्रवेश्यपदार्थैः रचनीयम्। गृहाभ्यन्तरिककोणा अर्धवृत्ताकारा भवेयुः। भित्तीनामाभ्यन्तरिक भागा अधिष्ठानाद्वितानपर्यन्तं सुश्लक्ष्णीकार्याः। यतः सुखं प्रक्षाल्याः स्युः। द्वारदेहली तलापेक्षयोन्नता माभूत्। यतः पादाघातशङ्का न स्यात्। द्वारकपाटफलकानि पृथुकानि वैषम्यरहितानि भवेयुः। तन्मध्यस्थलस्य निम्नोन्नतत्वेन तत्र धूलिस्थित्या मालिन्यमापद्यते। द्वारमध्यविस्तारो हस्तत्रयान्न्यूनो न भवेत्। यतः प्रापिका (Strature) सुखं नेतुं शक्येत।

## वस्तूनि

रोगिगृहेषु तावन्त्येव वस्तूनि रक्षणीयानि यावन्ति रोगिणां परिचारकाणाञ्चात्यन्तावश्यकानि भवेयुः। व्यर्थं वस्तुजातं कदापि न स्थापयेत्।

## शय्याः

लौहतारगुम्फिताः सार्धषट्स्फीतायताः ३ स्फीतविस्तृताश्च भवेयुः। शणमुञ्जाद्यन्यतमरज्जुगुम्फितासु शय्यासु मत्कुणा भृशमुत्पद्यन्ते।

## विशेषः

चिकित्सालये सर्वाणि वस्तुजातानि स्वच्छीकरणसुखान्येव रक्षितव्यानि।

प्रतिदिवसं प्रातः सायं कासीसाद्यन्यतमनिष्कीटकघोल-द्वाराऽऽतुरालयतलं मार्जनीयम्।

रोगिणां वस्त्राणि सदा निर्मलीकार्याणि।

चिकित्सकपरिचारकादिभिरातुरस्पर्शनानन्तरं सद्यो हस्तौजन्तुघ्नद्रवेण प्रक्षालनीयौ। एतदर्थं द्रवपूरितपात्रं वहिर्विरामदायां सततं रक्षणीयम्।

नाडीं दृष्ट्वा तु यो वैद्यो हस्तप्रक्षालनं चरेत्।
दोषशान्तिर्भवेत्तस्य गंगास्नानफलं लभेत्॥

## संक्रामकरोगिगृहसम्बन्धिनियमाः

संक्रामकरोगिगृहे चिकित्सकादय आच्छादितशरीरावयवाः प्रविशेयुः। वहिर्गमनसमये च हस्तौ सम्यक् प्रक्षालयेयुः।

परिचारकाः स्ववस्त्रपरिवर्तनादन्तरेण न क्वाऽपि ततो वहिर्गच्छेयुः। परिधानवस्त्राणि कार्पासमयान्येव भवेयुः। रोगिणां निरीक्षणार्थं ये तत्सम्बधिनः तत्र समागच्छेयुः, तेऽप्यावृतशरीरा एव प्रविशेयुः। निर्गमनकाले तु हस्तमुखौ प्रक्षालयेयुः।

यैः सह दानादानव्यवहारः स्यात् ते चिकित्सालयसीम्नो वहि गन्तुं नाऽऽज्ञाप्याः ।

मुक्तरोगाजना उष्णोदकस्नाता निर्मलाम्बराः सन्त आतुरालयात्पृथक् कार्याः ।

## मलसङ्करादिदूरीकरणविधयः

सङ्करकिट्टभेदाद् द्विविधं मलं भवति ।

सङ्करमले – गृहस्य पांसुभस्ममृत्तिकाखाद्यपदार्थावयवादीनि, गोशालाश्वशालाविपणिराजमार्गवीथिका-कार्यालयादीनां शुष्कमलानि च गण्यन्ते ।

किट्टमले—पुरीषमूत्रादिकं शौचालयस्नानशालामहानसादि गृह-मार्जनजलमन्यद् मलिनं जलं च गण्यते ।

पूर्णस्वास्थ्यप्रदकरणार्थं नगरस्य सर्वप्रकारकमलानां वहिः क्षेपणस्य समुचितप्रवन्धः कार्यः ।

Indira Gandhi National Centre for the Arts

## सङ्करमलस्यदूरीकरणम्

प्रथमतः सङ्करः पात्रे निक्षेपणीयः । पात्रञ्चैतद् गृहात् किञ्चिद्-दूरे जनसमागमनसुखेऽधिकावकरप्राप्तिस्थले वर्षा‡वाताभ्यां सुरक्षितेप्रस्तरेष्टिकानिर्मित एकस्मिन् चत्वरे स्थाप्यम् । चात्वरिक-मलिनजलनिर्गमनार्थमेका नाली भवेत् । अवकरपात्रं द्विविधं भवति चलमचलञ्चेति । चलपात्रं वृत्ताकारं लौहपत्र निर्मितं विवृतमुखद्वयमितस्ततोनेयंस्वच्छीकरणसुखञ्च भवति । अचलपात्रं तु वर्गाकारमिष्टिकानिर्मितमन्तःश्लक्ष्णं ( कृत सीमेन्टं ) स्वच्छी-करणकृच्छ्रमनेयञ्च भवति ।

अवकरपात्रं दिवैकदाऽवश्यं निर्मलीकार्यम् । आवश्यकता

‡—वृष्टितोरक्षार्थंचत्वरोपर्येकं वितानं कार्यम् ।

नुसारेणानेकावकरपात्राणि नगरे सर्वत्र स्थापनीयानि । प्रति सहस्रमनुष्यंपात्रैकमलम् । सुखं निर्मलीकरणार्थं वृहदवकरपात्रापेक्षयालघुपात्राणि श्रेष्ठतराणि ।

यदि सम्भवतः प्रतिगृहद्वारसन्निकटे लघ्ववकरपात्रं साच्छादनं स्थाप्येत तर्ह्यत्युत्तमं भवेत् ।

पात्रस्थापितं मलं प्रज्वालनद्वारा प्रपूरणद्वारा चेतिप्रकारद्वयेन दूरीक्रियते ।

( १ ) प्रज्वालनम्*—मलनाशनस्योत्तमो विधिरयम् । किंतु वर्षर्तावेषा क्रिया सम्यङ् न भवति । भस्मीभूतः सङ्करोऽल्पत्वादल्पव्ययेन सुखं च वोढुं शक्यते । तद्भस्म मार्गादिनिर्माणार्थमुपयुज्यते ।

( २ ) प्रपूरणम्—अस्मिन् विधौ संकर आच्छादितशकटेनोत्थाप्य नगराद् वहिर्नीयते । तच्च गर्तेप्रपूर्यते । कदाचिन्नगरेऽपि निम्नस्थलप्रपूरणार्थमुपयुज्यते । साच पूरितभूमिः इत्युच्यते । न्यूनातिन्यूनं विंशतिवर्षपर्यन्तमावासार्थमनुपयोज्या भवत्येषा । नास्त्ययमुत्तमो विधिः ।

यतः पूरितभूमिः सन्निहितजलं दूषयितुं शक्नोति । तत्र मशकमक्षिकादिक्षुद्रजन्तवः मूषकादयश्च वहुधा निवसन्ति । मालिन्यमपि सदा तिष्ठति । अत एवंविधाभूमिरसन्निहितजलाशया नगराद्वहिर्नातिदूरे भवेत । यावत् पूर्यमाणभूमिः समतला न स्यात्तावत् क्रमशोऽवकरस्य स्फीतद्वयोत्सेधस्तरोपरि मृत्तिकायाः षट्स्फीतोच्छ्रयः स्तरो विस्तार्यः । यत्र च हलद्वारा शाकादिकमुत्पादयितुं शक्यते ।

---

*—अद्यत्वे एका भ्राष्ट्री प्रचलितास्ति । यत्रावकरं निधाय किञ्चित्कोकिलाग्निद्वारा प्रज्वाल्य भस्मीक्रियते ।

ग्रामे तु जनाः संकरं स्वगृहद्वारसविधएव निक्षिपन्ति। अनारोग्यकरमेतत । ग्रामाद्बहिरेव निक्षेपणीयः । किञ्चित्कालानन्तरं क्षेत्रे प्रक्षेप्य हलं प्रचाल्य कृषिः कार्या ।

## किट्टमलस्य दूरीकरणम्

किट्टमलस्य दूरीकरणार्थं द्वौ विधी स्तः । सञ्चयविधिः जलवाहनविधिश्चेति ।

### ( १ ) सञ्चयविधिः

'चण्डालयोषितस्तास्ताम्रायःमीसभूषणाः सर्वाः ।
पूर्वाह्णे मलमोक्षक्रियोद्यता ग्राममावेश्य ॥
( म० मृ० अ० ९ )

अस्मिन् विधौ चाण्डालः प्रत्येकं गृहं गत्वा शौचालयं निर्मलीकरोति । मलंच शकट्यां निधाय नगराद्बहिर्नयति ।

शौचालयः—गृहेषु व्यक्तिभ्यो निर्मीयते । अयं गृहाधस्तले निवासकुटीरान् न्यूनातिन्यूनं ६ स्फीतान्तरे, तथा कूपाद्यन्यतम जलाशयात् ४० स्फीतान्तरे भवेत् । अस्य तलं प्रस्तरसीमेण्टाद्यप्रवेश्यपदार्थैर्निर्मातव्यम । यच्च भूतलादर्धस्फीतोच्चकं स्यात् । भित्तयोऽपि श्लक्ष्णाः प्रस्तरसीमेण्टान्यतरनिर्मिताः स्युः । अत्रैको गवाक्षो भवेत् । यतः कपाटावरणादपि शुद्धवायुरागच्छेत् । मलपात्रस्थानमपि सीमेण्टप्रस्तररचितं स्यात् । तदधिष्ठानं नागरिकनालीदिशि किञ्चिन्निम्नगं भवेत् । यतो मूत्रादिकं स्वयमेव नाल्यां निर्गच्छेत् । मलपात्रस्थानस्य वाह्यद्वारमेतावद्विवृतं स्याद्येन चाण्डालो निर्वाधं निर्मलीकर्तुं शक्नुयात् । स्वच्छता दिवा वारद्वयं कार्या । मलपात्रस्थानस्य व्यासः ९ पर्वकादनधिकः, उत्सेधः ६ पर्वकादन्यूनः स्यात् ।

मलमूत्रार्थं पृथक्पृथक् पात्रं * स्याच्चेत्तर्ह्यत्युत्तमता भवेत्। एवं सति मूत्रकणोत्पतनं शीघ्रंच पुरीषोत्कुथनं न भवति। तथा मलस्य दहने खातप्रपूरणे वा सौकर्यं सम्पद्यते।

सामान्यवर्चोगृहम्—सर्वसाधारणजनार्थं निर्मीयते। यदस्थायि स्थायिचेति द्विविधं भवति। अस्थायि, सम्मेलनोत्सवादौ प्रयुज्यते। स्थायि वर्चोगृहं जनावासतः २० स्फीतादधिकान्तरे, कूपादिजलाशयात् ५० स्फीतादधिकान्तरे च भवेत्। एतत् समुन्नतकठोरस्थले लौहपत्रैरिष्टिकाभिर्वा निर्माप्यम्। प्रत्येकवर्चोगृहे गोपनार्थमेको द्वारकपाटः, शौचाय जलपात्ररक्षणार्थमेकं विशेषस्थानं च स्यात्। शुद्धवातागमनार्थं कपाटोपरिभागे छिद्राणि जालकानि वा भावेयुः। पुरीषमूत्रार्थं पृथक् पृथक् पात्रं † लौहश्लक्ष्णचीनीयमृत्तिकान्यतरनिर्मितं स्यात्। स्त्रीपुरुषेभ्यः पृथक्पृथग्वर्चोगृहाणि स्युः। वसत्यनुसारेण प्रति त्रिंशन्मनुष्यमेकं वर्चोगृहं स्यात्। तच्चदिवाऽऽनेकवारं निर्मलीकार्यम्। एकत्रीकृतं मलमेकस्मिन् लौहनिर्मिते साच्छादने वृहत्पात्रे निधातव्यम्। तच्च दिवा वारद्वयं मलशकट्यां निःक्षिप्यनगराद्बहिर्नीत्वा खातादौ प्रपूरणीयम्। मलनिधानपात्रं‡ सदा स्वच्छीकार्यम्। वर्चोगृहस्याभ्यन्तरे तत्पृष्ठभित्तिसंलग्नाश्च नाल्यो भवेयुः। या नगरस्य वृहन्मलपथेनसम्बद्धः स्युः। मलपथाभावे इष्टिकासीमेण्टरचितमेकं क्षुद्रगर्तं कार्यं यत्र मूत्रादिकमेकत्रीभवेत्। तन्मलद्रवं दिवा वारद्वयं नगराद्बहिर्नियतस्थले प्रक्षेप्यम्।

मलशकटिः—इयं वेल्लनाकारा लौहनिर्मिता साच्छादना

---

* अद्यत्वे पात्रमेवम्भूतं निर्मितं यत्र मूत्रकणा नोत्पतन्ति।

† ‡ कोलतारेण प्रतिमासं प्रलिप्तं कार्यम्।

भवति। अन्याप्येका भवति यत्र मलपात्राण्येव सन्निधाय नगराद्बहिर्नीयन्ते। सा 'पात्रशकटिः' इत्युच्यते। लघुवर्चोगृहार्थंश्रेष्ठतरेयम्। यतः शकट्यां पुरीषभरणाद्यद्दौर्गन्ध्यमुत्पद्यते तन्मलपात्राणां स्थापने न भवति। शकट्यां मलभरणस्य समयो रात्रौ ९ वादने सुप्रातर्वा भवेत्। मन्दगतिकशकट्यपेक्षया द्रुतगतिका श्रेष्ठतरा।

## किट्टमलस्यान्तिमो निक्षेपः

एकत्रीभूतस्य मलस्य निक्षेपणार्थं त्रयो विधयः सन्ति, खातप्रपूरणं गर्तप्रपूरणं प्रज्वालनञ्चेति।

खातप्रपूरणम्—सर्वोत्तमो विधिरयमेव यन्मलं खाते प्रपूर्य किञ्चित्कालं भूमावधिवासयेत्। ततः खादरूपत्वेनापद्यमानंतत् कृषकेभ्योदद्यात्। खातभूमितलमार्द्रं जलपूर्णं वा न भवेत्। किन्तु सन्निहितभूमितलात्किञ्चिदुन्नतं शुष्कं च स्यात्। यतस्तत्र जलं न कदाप्येकत्रीभवितुं शक्नुयात्। एवम्भूताया भूमेरप्राप्तौ भूतलं स्वयमेव मृत्तिकया समुन्नतीकार्यम्। पूरणार्थंमृत्तिकाग्रहणार्थं सन्निकट एवैकं गर्तं खननीयम्। यत्र स्थितेन वार्षिक जलेन मलशकटिर्मार्जनीया। इयं खातभूमिर्नगराद्बहिर्न्यूनाति न्यूनतः ३०० दण्डान्तरे, पेयजलाशयात् १५० दण्डान्तरे चावातमुखायां दिशि रहसि भवेत्। इमां समतलां कृत्वा द्वादशभागेषु विभजेत्। प्रत्येको भागो मासैकस्य मलप्रपूरणायालं स्यात्। या भूमिः खातार्थमेकदा प्रयुक्तास्यात्। सा वर्षद्वयं यावत् तदर्थं नोपयोज्या।

## खातपूरणप्रकाराः

(१) गभीरखातपूरणविधिः—अत्र खातानि २ स्फीत विस्तृतानि, २ स्फीतगभीराणि च खन्यन्ते। यानि

सरलसमानान्तररेखासु परस्परं स्फीतद्वयान्तर्ये भवन्ति। यत्र ८ पर्वतः १२ पर्वगाम्भीर्यात मलमूत्रेणापूर्योपरिखनितमृत्तिका प्रक्षिप्यते। खातपूरितं मलं ६ मासानन्तरमहानिकरं जायते। ततः खादरूपत्वेनापद्यमानं तत् कृषकेभ्यो दीयते। परन्तु विक्रयणात्पूर्वं निखन्य परीक्षणीयं यत्खातपूरितपदार्थाः शुष्का दौर्गन्ध्यरहिताः सन्ति नवेति। समयोऽयं यदस्य खातपूरितपदार्थस्य परिवर्तने लगति, प्रत्येकभूमिप्रकृत्योपर्याश्रितः।

खातार्थं प्रतिसहस्रमनुष्यं तृतीयांशैकड़स्थानस्य प्रतिवर्षमावश्यकता भवति।

एवं मूत्रमपि खाते प्रपूरणीयं भूतले वा प्रक्षेपणीयम्। भूतलस्य खण्डचतुष्टयं कृत्वा प्रत्येकखण्डे प्रतिसप्ताहं पर्याय क्रमेण मूत्रं प्रक्षेप्यम। द्वितीयवारे भूतलखण्डे हलं प्रचाल्य पुनः प्रक्षेप्तव्यम्।

( २ ) अगभीरखातपूरणविधि :— अत्र खातं २ स्फीतविस्तृतं ६ पर्वगभीरं खन्यते। खातयोः पंक्तिद्वयमध्यस्थले स्फीतैकस्यान्तर्यं भवति। द्विपर्वगभीरं मलेनाऽऽपूर्य खातस्य शेषभागः शुष्कमृत्तिकया प्रपूर्यते। अत्र भूमौ कृषिः क्रियते। खादातिशयेन ये पदार्था उत्पद्यन्ते तेऽत्र सुतरां भवन्ति। अस्मिन् विधौ गभीरखातापेक्षया चतुर्गुणं [ प्रतिसहस्रमनुष्यं १, १।३ एकड़ ] स्थानं लगति। नास्त्ययमुत्तमो विधिः। यतोऽत्रमक्षिकादयो बाहुल्येन समुद्भवन्ति। यत्र देशे च जलाभावाद्रूक्षवातः प्रवहति तत्र तद्भूमौ जलमपि प्रक्षिप्यते। यतो वात्या तत्रस्थं खादमलांशं वहिर्न समीरयेत्।

( ३ ) तृतीयो विधि :- * अत्र १६ स्फीतायामं ५ स्फीतविस्तारम् १ स्फीतगभीरं च खातं खन्यते। द्विखातयोरंतरालं ६

---

* थौर्नहिलमहाशयेन बरेलीनगरे प्रथमतो विधिरयमुपयोजितः।

पर्वकं भवति। खातेभ्यो या मृत्तिका निष्कास्यते सा चूर्णी क्रियते। खातेषु मूत्रादिद्रवयुक्तमलं निःक्षिप्योपरि सा चूर्णरूपा मृत्प्रक्षिप्यते। एवं मलद्रवांशः तत्क्षणं विशुष्यति। अतस्तत्र मक्षिकादयो नोत्पद्यन्ते। द्रवयुक्तमलप्रपूरणाय विधिरयमत्युत्तमः अस्यां भूमौ तमाखोरालुकानां चोत्पत्तिः सुतरां भवति। तत्र च प्रायः ४ वर्षपर्यंतं खादप्रक्षेपणस्यावश्यकता न भवति।

( ४ ) चतुर्थो विधिः ‡—अयमपि तदैवोपयुज्यते यदा मलं मूत्रेण मलिनोदकेन च समन्वितं भवति। प्रथमत एकं १६ स्फीतायतं ५ स्फीतविस्तृतं च स्थानं माप्यते। ततस्तदुपरि २—३ पर्वकं गभीरं खनित्वाऽगभीरखातमिव निर्मीयते। तत्खाततल मृत्तिका ९ पर्वकमभितः खनित्वा छिद्रमयी क्रियते। ततस्तत्र मलमूत्रादिकं निक्षिप्यते। मलद्रवांशः सत्वरं विशुष्यति किट्टांशश्चोपरि सन्तिष्ठते। तदुपरि ३ पर्वकं मृद् विस्तार्यते। अत्र हलप्रचालनं विनैव शष्पादीनां कृषिःकार्या। अस्मिन् विधौ मलं प्रायः सप्ताहात् पूर्वमेव विघट्टते। एतदर्थमगभीरखातापेक्षया चतुर्गुणा भूमिः स्यात्। अत्र ४—५ वर्षपर्यन्तं पुनः खादप्रक्षेपणस्यावश्यकता न भवति परन्त्वत्र मक्षिकादय उत्पद्यन्ते। यदि तत्र निर्वापित चूर्णं प्रक्षिप्येत तर्ह्ययं दोषोऽपगम्यते।

## गर्तप्रपूरणम्

अद्रवाणामीषद्द्रव्युक्तानां वा मलानां निक्षेपणार्थं प्रकारान्तरमेतत। प्रायेणात्र गर्त २० वर्गस्फीतक्षेत्रफलकं ४ स्फीत गभीरं च खन्यते। तच्च मलेन प्रपूर्यते। मलप्रपूरणकाले मध्ये मध्ये मृत्तिकास्तरोऽपि विस्तरणीयः। तथा गर्तोपर्य्येक स्फीतोन्नता मृत्तिका प्रक्षेप्या। एवंकृते त्रिमासानन्तरं खादायो-

‡ विधिरयं प्रयागे प्रयुज्यते।

प्रयोज्यं जायते। परन्तु चिरकालस्थित्या तदुत्पादकशक्तिर्विनष्टा भवति। गर्तमिदं निवासस्थानाज्जलाशयाद्वा ५५० दण्डाभ्यन्तरे न खननीयम्। यस्मिन् मलमूत्रं मलिनजलं च सम्मिलितं भवति तत्र सूर्यतापेन क्षुब्धं भूत्वा विघट्टते। दौर्गन्ध्यञ्चात-नोति। यदा च वहु शुष्कं जायते तदा विघटनजन्यदूषितवायुना स्वोत्पादकशक्तिं परित्यजति। सुप्राचीनो विधिरयम्। यत्र चाण्डाला गृहं गृहं गत्वा मलं समाहृत्य स्वयं निक्षिपन्ति तत्रा-यमुपयुज्यते। अस्मिन् विधौ यदि सुसावधानता न क्रियेत तर्हि न स्यादस्य सन्तोषजनकत्वम्।

## प्रज्वालनम्

विधिरयं यत्र द्रवाद्रवयोर्मलयोः पृथक् पृथक् सञ्चयः क्रियते शुष्ककाष्ठं वहु समुपलभ्यते, वर्षा च स्वल्पा भवति तत्र प्रयु-ज्यते। प्रज्वालनस्थानं नगराद् वहिः समीप एव भवेत्। तत्रैकं शुष्ककाष्ठसंरक्षणार्थं गृहमपि स्यात्। प्रज्वालनार्थंकाष्ठं स्वल्पं स्वल्पं शनैः शनैः प्रक्षेप्यम्। तत्र चैकः चाण्डालः सर्वदा तिष्ठेत्। सार्वजनिकवर्चोगृहसमीपे, मलशकटिनिवेशस्थानेऽपि प्रज्वाल्यते।

## मूत्रालयः

प्रायो जनाः स्वभावतः नगरे वीथिकासु गृहभित्तिपृष्ठभाग एव मूत्रयन्ति। अतः यत्र जनतागमनागमनवाहुल्यं स्यात्तत्रोप-युक्तस्थानेषु मूत्रालयानां प्रवन्धः कार्यः। जनैरपि तत्रैव मूत्रोत्स-र्जनं कार्यं नान्यत्र क्वापि।

अद्यत्वे द्विविधो मूत्रालयो निर्मीयते। दृढश्लक्ष्णतलो पर्येकश्चत्वरः क्रियते। तत्तटादधो मूत्रणपात्रं निधीयते।

चत्वरोपर्युपविश्य मूत्र्यते । यदा मूत्रपात्रं परिपूर्णं जायते तदा तदपनीय द्वितीयं रिक्तं पात्रं निधीयते । एकत्रीभूतं मूत्रं खाते निक्षिप्यते ।

( २ ) उपर्यधः क्रमेण पात्रद्वयं स्थाप्यते । उपरितने पात्रे छिद्रं भवति यदुपरि काष्ठचूर्णं [ बुरादा ] प्रक्षिप्य मूत्र्यते । सर्वं मूत्रमधः प्रस्नुतं भवति । यदा कदा काष्ठचूर्णं परिवर्तनीयम् । स्वास्थ्यदृष्ट्या श्रेष्ठतरोऽयम् ।

## प्रणाल्यः

संचयविधौ स्नानशालादीनां मलिनं जलं नगरसभाद्वारा निर्मिताभिः प्रणालीभिरेकत्री भवति । एताः प्रणाल्यः प्रस्तरादिना केनचिदनाचूषकपदार्थेनागभीराः सरकतटाभ्यां सहैव निर्मीयन्ते । प्रायो बालकादयः तत्रैव मलमूत्रादिकं त्यजन्ति । अतो दिवा वारद्वयं तच्छुद्धिरवश्यं कार्या । तदेकत्रीभूतं मलिनं जलमन्ततो नद्यां सम्मेल्यते । परन्तु यदि नलकेन कुल्याकेदार द्वारा वा यथासम्भवं क्षेत्रे प्रक्षेप्येत तर्हि सुतरामन्नोत्पत्तिः स्यात् । एतेन मन्दगत्या सिच्यमानोषराभूमिरप्युर्वरा जायते ।

## ( २ ) जलवाहनविधिः

सञ्चयविधौ मलमूत्रादिकं किञ्चित्कालमेकत्रीक्रियते । पश्चाद् बहिर्निक्षिप्यते । अतोऽनेकाः क्षतयः सम्भवन्ति । ( १ ) एकत्रीभूतं मलं समाच्छादितं सत् सुरक्षितं न स्याच्चेत्तर्हितत्र मक्षिका अण्डानि दातुं शक्नुवन्ति । ( २ ) अनेकवृषभशकटिचाण्डालादीनां नियुक्त्या व्ययाधिक्यं भवति । ( ३ ) सङ्करमलनिक्षेपणं चाण्डालाश्रितं, परन्तु सुप्रबन्धेनाऽपि चाण्डालाः प्रायेण यदा कदाकार्यं परित्यजन्ति । अतः सर्वप्रकारेणापि जलवाहनविधिः

श्रेष्ठतरो मन्यते । यतोऽत्र मलमूत्रादिकनिक्षेपणं पराश्रितं न भवति । परन्त्वयं विधिस्तत्रैव व्यवह्रियते यत्र जलाधिक्यं भवेत् । अतः सर्वनगरे नोपयोक्तुं शक्यते ।

## साधनानि

जलवाहनविधौ मुख्यसाधनानि चत्वारि भवन्ति—जलसंवाहकमलपात्रं किट्टनलो गृहमलपथः किट्टवाहश्चेति ।

## जलसंवाहकमलपात्रम्

एकस्मिन् कुटीरे मलमूत्राद्यर्थं यन्त्रविशेषस्य प्रबन्धो भवति । तत्र मलवाहनार्थमेकं लघु जलसञ्चयन ( हौज ) मप्यपेक्ष्यते । यत्र मलमुत्सृज्यते तद् 'जलसंवाहकपात्र' मिति निगद्यते । एतदप्रवेश्यपदार्थैः श्लक्ष्णप्रस्तरचीनीयमृत्तिकादिभिर्निर्मितं पर्याप्तजलाधारकमनुत्पतनीयोदकं च स्यात् । अस्य स्थानं गृहस्यैकतटे मुख्यभित्तेर्बहिः किञ्चिद्दूरे वा क्रियते । किंतु तेन सहैकवीथिकाद्वारा गृहसम्बन्धो भवेत् । शौचालयस्य भित्तयःश्लक्ष्णाः सीमेन्टादिनिर्मिताः स्युः अनेकतलकसदने प्रातिखण्डिकानि वर्चोगृहाणि मिथो नीचैरुपरिक्रमेण भवेयुः । तेषां तलानि प्रस्तरसीमेण्टनिर्मितानि मध्यस्थमलपात्रं प्रत्यभितो निम्नगानि स्युः । पादरक्षणार्थं मलपात्रस्योभयदिशि तत्समतले पादपीठे निर्मीयेते । वर्चोगृहस्य क्षेत्रफलं ६ वर्गस्फीतान्न्यूनं न कदापि कार्यम् ।

जलसञ्चयनम्—मलपात्रशोधनार्थं वर्चोगृहे यल्लघुजलसञ्चयनमपेक्ष्यते तन्मलपात्रम् ५—८ स्फीतोच्चतायां भित्तिसंलग्नं स्यात् । इदं लौहप्रस्तरयशदान्यतमनिर्मितं साच्छादनं भवेत् । यतः धूलिमक्षिकामशकादयः तत्र न समाविशेयुः । अस्मिन् १५

सेटकं जलमागच्छेत्। तथा चैतन्मलपात्रस्य पृष्ठभागीयतटेन सहैकसीसकनलिकाद्वारा संयुक्तंस्यात्। अस्या नालिकाया व्यासः २—३ अंगुलमितो भवेत्। अस्या पेयजलसञ्चयनेन सह सम्बन्धो न कार्यः। अस्मिन् जलसञ्चयने गुप्तद्वारमेकं भवति। येनास्य जलराशिर्नियतः तिष्ठति। अस्य क्रिया स्वयं भवति। यदाऽस्य-शृङ्खलाऽऽकृष्यते तदा जलसञ्चयनस्थं सर्वंजलमधोमलपात्रे सहसाऽऽपतति। ततो जलवेगेन सह मलमधः किट्टनलादिद्वारा निर्गच्छति।

विपाशः—दूषितवायुदौर्गन्ध्यावरोधार्थं मलपात्रतत्सम्बद्ध किट्टनलयोर्मध्ये एको विपाशः संयोज्यः। यः किञ्चिज्जलसञ्चय मपि कर्तुं शक्नुयात् तथा मलपात्रं प्रति दूषितवातागमनम प्यवरुन्ध्यात्। अयं वक्रनलिकाकारो भवति। यत्र किञ्चिज्जलम-वरुद्धं सत् तिष्ठति। तदेवोदकं दूषितवायुं गृहे न प्रवेशयति। विपाशेन मलप्रवाहे बाधा न भवति। इमे बहुप्रकारका भवन्ति, तेषु P, S इत्याकारकौ श्रेष्ठतमौ।

## किट्टनलः

यस्यैकं शिरो मलपात्रस्य विपाशेन सह, द्वितीयं च गृहम-लपथेन सह संयोज्यते स किट्टनल उच्यते। सोऽयं सीसकलौ-हान्यतरनिर्मितो वलयाकारः ४ पर्वव्यासको भवति। अत्र वर्चोगृहमूत्रालययोरेव मलं प्रवहेन्नान्यत्। एष गृहस्य वाह्यभित्त्या साकं वहिरेव सलग्नः कार्यः।

## गृहमलपथः

यः किट्टनलीयं मलं किट्टवाहे प्रापयति स नलो गृहमलपथ इत्युच्यते। अस्य संधिस्थलं दृढं भवेद् यतः जलं न कदापि च्यवेत। अस्याभ्यन्तरीयभागः समतलः चिक्कणश्च स्यात्।

यतस्तत्र मलं नैकत्री भवेत् । सर्वाः शाखा या अत्र संयुक्ता भवेयुः संयोगस्थले न्यूनकोणं रचयेयुः । सचास्य नलस्य प्रवाहदिशि स्यात् । किञ्चित्किञ्चिद्दूरेऽत्रैवम्भूतानि छिद्राणि कार्याणि यैरस्य निरीक्षणंकर्तुं शक्यं स्यात् ।

गृहमलपथोऽयं प्रायेण प्रस्तरैश्चिक्कणमृत्तिकया वा निर्मीयते । अस्य संधयः सीमेण्टेन संयोज्यंते ।

मृदुभूमौ, तथा च यत्राधिकभारपतनसम्भावनास्यात्तत्र लौहेन निर्मातव्यः । तत्सन्धयस्तु सीसकेन संयोज्याः ।

गृहमलपथः प्रस्तरखण्डानामप्रवेश्यस्तरोपि विष्टरणीयः । यतस्तत्सन्धिविमुक्तिसम्भावना मा भूत् । स चैवम्भूतो निम्नगः कार्यो यत्तत्रस्थं मलं सुखं प्रोह्य निर्गच्छेत् । एष गृहादधो मध्यभागाद्वा न गमनीयः । अस्य, किट्टवाहस्य च मध्ये संयुक्त एको विपाशः स्यात् । यतो दौर्गन्ध्यं न आगन्तुं शक्नुयात् ।

## किट्टवाहः

यत्रानेकसदनानां मलानि गृहमलपथद्वाराऽऽगत्यवहन्ति स किट्टवाह इति निगद्यते । परीक्षणार्थमत्र श्वभ्रप्रवाहद्वाराणि निर्मीयन्ते । अयं किट्टवाहो द्विविधो भवति [ १ ] वर्षादिजलार्थम् [ २ ] गृहस्य शेषमलार्थञ्च । क्वचिदेतौ पृथक् पृथग् भवतः, क्वचित्तुद्विक्रियार्थमप्येक एव नलो भवति । एष प्रस्तरखण्डानामप्रवेश्यस्तरोपरि सरकतलादधो दशस्फीतगम्भीरे भूम्यभ्यन्तरे यथासम्भवं सरलरेखायां निम्नगः कार्यः । यतः किट्टप्रवाहे वाधा न भवेत् । अन्यैः सह संयोगस्थलेऽस्य संधिरीषत्तिर्यक् स्यात् । यस्तत्र किट्टं नैकत्री भवितुं शक्नुयात् । अस्य निम्नगत्वं तथा वर्धनीयं यथा प्रवाहः प्रतिसार्धद्विविपलं ३ स्फीतगतिको भवेत । यः किट्टवाहो २ स्फीतव्यासकः, स

चीनीयमृत्तिकया लौहेन वा निर्मितो वर्तुलाकारो भवति। ततोऽधिकव्यासकस्तु सीमेण्टेनेष्टिकाभिर्वा निर्मितोऽण्डाकारको भवति। यस्य संकुचितं शिरोऽधःप्रवाहदिशि, विस्तृतं च शिरः उपरिष्टात् क्रियते।

व्यासेन यावदेव महान् किट्टवाहः स्यात्तावदेव तस्य निम्नगत्वन्यूनताया आवश्यकता भवति।

यदि किट्टवाहः १० स्फीतव्यासकः स्यात्तर्हि भूमितलं प्रतिक्रोशार्धं २ स्फीतं, यदि च ५ स्फीतव्यासकस्तर्हि ४ स्फीतं निम्नगं कार्यम्। एतावन्निम्नगत्वे किट्टवाहे मलं भूमेर्गुरुत्वाकर्षणशक्त्या वहति। यदि तावन्निम्नगत्वमसम्भवं स्यात्तदा किट्टं प्रेरण ( Pump ) शक्त्या प्रेरणीयम्।

श्वभ्रम्—किट्टवाहप्रवेशमार्गः श्वभ्रमुच्यते। एतानि दूरेदूरे विशेषतः किट्टवाहस्य संधिभागे गभीरलघुकुटीराणीवेष्टिकाभिर्निर्मीयन्ते। यन्मध्यतो वृहन्नाला [ किट्टवाहः ] याति। तत्स्थानादेव तच्छाखा उद्भवन्ति। इमानि पर्याप्तविस्तृतानि कार्याणि। यतो निरीक्षणार्थं तथा शोधनार्थं मनुष्याःसुखं गन्तुमागन्तुं च शक्नुयुः। तदुपरि मार्गतले श्वभ्रप्रवेशद्वारकपाटं लौहनिर्मितं सजालकं विधेयम्। यतो वायोःसंचरणं तत्र सम्यग्भवेत्।

प्रवाहद्वारकम्—इदं प्रायेण किट्टवाहान्ते विधीयते। किट्टवाहप्रवाहे काचिद्बाधा न भवेत्, यदि च तत्र किमप्यवरुद्धं स्यात्तदप्यस्य साहाय्येन निर्गच्छेदेतदर्थमेतत् प्रयुज्यते। यदेदमावृतं क्रियते तदा समस्तकिट्टं पश्चात् परावर्तते। उद्घाटिते सति तत् संश्लिष्टमपि किट्टमभितः सवेगं सहसा वहिरायाति। एतदर्थं नलयुक्तानि वृहज्जलसंचयनान्यपि रक्ष्यन्ते। तद्द्वारा समस्तकिट्टवाहः स्वच्छीक्रियते। जलाशयाभावे कहार ( भिश्ती )

द्वारेणापि प्रबंधोऽयं सम्पाद्यते। अर्थाच्छत्रभ्रद्वारा वहुजलं प्रक्षेप्य किट्टवाहः स्वच्छी क्रियते।

किट्टवाहेषु वातप्रविचारः—किट्टवाहेषु तथाप्रबन्धो विधेयो यथा सम्यग्वातप्रविचरणं भवेत्। एतदर्थं प्रतिपंचाशद्दण्डान्तरं वातप्रविचारकाः ( Ventilatars ) नियोजनीयाः। यतः किट्टविघटनादुत्पन्ना दुर्गन्धिवाता वहिर्निर्गन्तुं शक्नुयुः। एते प्रायो लौहनिर्मिताः ( धूतूसदृशाः ) किट्टवाहसम्बद्धाः सन्निहितगृहसंलग्नाश्च भवन्ति। येषां द्वितीयं शिरः तद्गृहवितानोपरि समाप्तिमेति। तच्चैकजालिकाद्वारा समाच्छादितं भवति।

## किट्टस्यान्तिमोनिक्षेपः

जलवाहनविधिद्वारा यत्समग्रं किट्टमेकत्रीभवति तस्यान्तिमनिक्षेपार्थं निम्नलिखितविधिषु कश्चिदेकः प्रयुज्यते—

[ १ ] किट्टस्य समुद्रे सम्मेलनम्।

[ २ ] नद्यां निपातनम्।

[ ३ ] शुद्धं कृत्वोपयोजनम्।

[ ४ ] क्षेत्रे प्रसेच्य खादनिर्माणम्। इति

[ १ ]

समुद्रतटस्थानां नगराणां किट्टस्य निक्षेपार्थं समुद्र सम्मेलनमेव सर्वोत्तमः सरलश्चोपायः। परन्तु समुद्रस्यान्तस्तावद्गाम्भीर्यजलेऽधःसम्मेलनीयं यतस्तरङ्ग [ ज्वारभाटा ] समये किट्टं पुलिने न आगन्तुं शक्नुयात्।

[ २ ]

यद्यपि विधिरयं सुप्रचलितोऽस्ति तथापि वहुहानिकारक एषः।

यतो जनाः किट्टमिश्रितमपि नदीजलं गृहीष्यन्त्येव । अतो वसतितो दूरे, यथासम्भवं विशुद्धं कृत्वा सम्मेलनीयम् ।

[ ३ ]

किट्टस्य सेन्द्रियपदार्थानामपनयनमितिशुद्धेः तात्पर्यम् । अत्र त्रय उपायाः क्रियन्ते, अवस्थापनं प्रसादनं प्रक्षेपणञ्चेति ।

तत्रावस्थापनम्—अस्मिन् विधौ द्रवकिट्टमिष्टिकासीमेण्टरचिते जलाशये एकत्रीक्रियते । तत्स्थूलपदार्था अधस्तलं गत्वोपविशन्ति । उपरि च स्वच्छं जलं तिष्ठति । परन्तु वस्तुतोऽत्रापि पर्याप्तराशिका जीवाणवः सेन्द्रियपदार्थाश्च सम्भवन्त्येवातो हानिकरोऽयं विधिः । इदं पुनर्जन्तुघ्नद्रव्यद्वारा संशोधनीयम् ।

प्रसादनम्—अत्र द्रवकिट्टं भस्मांगारस्तरेण शनैः शनैः प्रसाद्यते । द्रवांशः पूतः सन्नधो गच्छति । स्थूलांशस्तु स्तरोपर्येवैकं बृहत्स्तरं रचयन् अवतिष्ठते । नास्त्ययमपि सन्तोषजनको विधिर्यतो निर्दोषीकरणार्थं प्रसादकस्तरो भूयोभूयः स्वच्छी क्रियते ।

प्रक्षेपणम्—अस्मिन्विधौ द्रवकिट्टे कतिपयरासायनिक पदार्थाः प्रक्षिप्यन्ते । यद्द्वाराऽवलम्बिताः पदार्थाः ससेन्द्रिया अधस्तलं गत्वोपविशन्ति । पुनरुपरिष्टे शुद्धप्राये जलेऽन्यद्रासायनिकं द्रव्यं प्रक्षिप्यते । तदुदकं च द्वितीयगर्ते नीयते । तत्रस्था अवशिष्टा अवलम्बितपदार्था अपि ह्यधो गच्छन्ति । जलं चोपरि शुद्धं तिष्ठति । तत्पुनः क्षेत्रसिञ्चनार्थं प्रयुज्यते, नद्यां वा निपात्यत इति ।

निम्नाङ्कितरासायनिकद्रव्याण्युपयुज्यन्ते—

( १ ) चूर्णम्-इदं ५ सेटके किट्टे माषैकपरिमितं प्रयुज्यते ।

( २ ) स्फटिका—इयं ५ सेटके किट्टे ५ रक्तिकमानो पयुज्यते ।

(३) चूर्णमिश्रितस्फटिका—एतत्प्रयोगः पृथक्पृथक्प्रयोगापेक्षया श्रेष्ठतरः। ५ सेटके किट्टे द्वयोर्मेलयित्वा ५ रक्तिकाः प्रक्षेप्याः।

वस्तुतो रासायनिकद्रव्यद्वारा किट्टशोधनं भारतसदृशे उष्णदेशे न सन्तोषप्रदम्। यतोऽनावृततडागे पतितं किट्टं सत्वरं विघट्य दौर्गन्ध्यमातनोति। तथा किट्टद्रवांशोऽपि सेन्द्रियपदार्थैः रोगजनकजीवाणुभिश्च रहितो न भवति। यदि द्रवो नद्यामपि निपात्येत, तथाप्यवशिष्टं स्थूलकिट्टं सद्रवत्वात् किञ्चित्कालं संशोष्यते। पश्चात् खादकर्मणि प्रयुज्यते।

[४] ❋

अस्मिन् विधौ किट्टे एवम्भूतानि रासायनिकद्रव्याणि प्रक्षिप्यन्ते यैः तत्रस्था अवलम्बितपदार्थाः शीघ्रमधो गच्छेयुः। उपरिष्ठद्रवद्वारा क्षेत्रं प्रसिच्यते। तथा स्थूलकिट्टमपि क्षेत्रे प्रक्षिप्य संशोष्य खादायोपयोज्यते।

क्षेत्रेषु समस्तकिट्टप्रक्षेपार्थमधिकभूमेरावश्यकता भवति। इयंच भूमिः छिद्रमयी स्यात्। यत्र च कठिना भवेत्तत्र खनित्वा बालुकाभस्मचूर्णानि मेलयित्वा सच्छिद्रा कार्याः। अत्र द्रव वहनार्थं प्रणाल्याः सुप्रबंधः कार्यः। सम्भवतः प्रतिसहस्रमनुष्यार्थमेकैकड़भूमिः पर्याप्ता। अत्रेक्षुशष्पशलगमपलाण्ड्वादिशाकानि भृशमुत्पद्यन्ते। परन्त्वेवंविधे स्थले मशकादयः प्राय उत्पद्यन्ते तथा सन्निहितकूपोदकमपि दूषितं भवतीति दोषः।

---

❋ अद्यत्वेलोके पञ्चमोऽपि विधिः प्रचलितोस्ति। यत्र वैज्ञानिकरीत्या कीटकुण्डनितारकस्तरसाहाय्येन किट्टस्य कीटाणुप्रतिकारं कृत्वोपयोगं कुर्वन्ति।

# संक्रामकरोगाः

अद्यत्वे कालादिपरिणामवशाद् यावन्तः संक्रामकरोगाः प्रचरन्तो दरीदृश्यन्ते न तावन्तः पुरा आसुः। अतएव प्राचीनायुर्वेदेऽतिसंक्षेपतो वर्णनं समुपलभ्यते। नास्त्यत्र कश्चन संदेहो यदनेके रोगाः सन्त्येवंविधा ये मनुष्यान्मनुष्यं, पशुभ्यो मनुष्यं च संक्रामन्ति। तदेतत्संक्रमणं जीवाणूनां स्थितौ समाश्रितम्। जीवाणवः* स्वजीवनं प्राणिशरीराभ्यन्तरे तथा बहिर्निर्वहन्ति।

---

टिप्पणी

* आकृत्यनुसारेण जीवाणवस्त्रिविधा भवन्ति :—

( १ ) अणुकीट :—( Micrococci ) बिंदुसदृशाकारः।

( २ ) तनुकीट :—( Bacilli ) शलाकाकारः।

( ३ ) वक्रकीट :—( Shirilla or vibrions ) वक्रः, कुण्डलाकारोवेति।

स्थित्यनुसारेणैते पुनर्द्विविधा उच्यन्ते :—

( १ ) जीविताश्रयिण :—ये जीवितप्राणिषु वनस्पतिषु वा स्वजीवनं यापयन्ति। एते प्रायेण रोगं जनयन्त्यतो 'रोगोत्पादका' इत्यप्युच्यन्ते।

( २ ) मृताश्रयिण :—ये केवलमृतकान् सेवन्ते। एते न रोगमुत्पादयन्ति।

यदैते जीवाणवोऽभ्यासवशादुभयोर्जीवितमृतयोः सेवनशीला भवन्ति तदा 'उभयाश्रयिण' इति निगद्यन्ते।

ते पुनरपि द्विप्रकारका :—(१) वातकीटा :—एतेषां जीवनार्थमोषजनस्यावश्यकता भवति। (२) निर्वातकीटा :—एषा मोषजनावश्यकता न भवतीति।

ते प्राणिशरीराभ्यन्तरं यदा प्रविशन्ति तदा पालिता असंख्यत्वं च प्राप्ता विषमुत्पादयन्ति। तद्विषं प्रतिरोगे भिन्नप्रकारकं भिन्न लक्षणकं च भवति। कतिचिद्रोगेष्वेकांगे, कतिपयेषु तु सर्वांगे विषमिदं प्रसरति। इमे जीवाणवस्तद्विषाणि वा रोगिणां मल-मूत्रस्वेदादिद्वारा वहिर्निःसृत्य स्वस्थमनुष्येषु संक्रामन्ति। तथोक्तं भगवता सुश्रुतेन—

प्रसंगाद् गात्रसंस्पर्शान्निःश्वासात्सहभोजनात्।
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्॥
कुष्ठंज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्॥

इति।

अत्र ज्वरपदेनागन्तुका आन्त्रिकादिज्वरास्तथा च सन्तता-दयो विषमज्वरा अवगन्तव्याः। औपसर्गिकरोगपदेन मसूरिका विसूचिकोपदंशादयो ज्ञेयाः

Indira Gandhi National Centre for the Arts

तथाहि सिद्धान्तनिदाने—

अथेदानीं प्रसिद्धा ये केचिदागन्तवो ज्वराः।
नानाविधविषोत्थानास्तान् वक्ष्यामः सविस्तरम्॥
विषं च तेषु प्रायेण भवेद् जीवाणुसम्भवम्।

---

टिप्पणी

तदेते कीटाणवो भूमौ जले पर्वते नगरे वायुमण्डले च प्रायः सर्वत्र सुदूरं प्रसृताः प्राप्यन्ते। तथाहि—

विषमज्वरकालज्वरोत्पादका एकविशेषप्रकारका जीविताश्रयिकीटाः, श्वसनकज्वरपूयमेहयोरणुकीटाः, ग्रन्थिकान्त्रिकश्लेष्मकज्वरयक्ष्म-विसूचिकाकुष्ठोत्पादकाः तनुकीटाः, आवर्तकज्वरफिरङ्गयोश्चो-त्पादका वक्रकीटाः सन्ति।

‡आन्त्रिको ग्रन्थिकश्चापि श्लेष्मकः सन्धिकस्तथा ।
यश्च श्वसनको नामाऽऽक्षेपको यश्च वक्ष्यते ॥
षडेते विषजा घोराः सर्वधातुप्रदूषणाः ।
ज्वराः स्युर्जानपदिकास्तथा काचनिका अपि ।
मसूरिकाद्या ये चान्ये भूवायुजलदोषतः ।
काले काले प्रवर्तन्ते तेऽपि ज्ञेयास्तथाविधाः ॥
दण्डकाख्यो ज्वरो दुःखस्तथान्यः कर्णमूलिकः ।
द्वावेतौ स्वल्पविषजौ सुखसाध्यौ विदुर्बुधाः ॥
संक्रामन्ति च सर्वेपि श्वसनस्पर्शनादिभिः ।

इति

"सन्ततः सततोन्येद्युस्तृतीयकचतुर्थकाः ।
जीर्णः सततकोवाऽपि स्मृतः कालज्वरोऽधुना ॥

---

‡ आन्त्रिकज्वरः—Enteric Fever of Typhoid-Fever, एन्टेरिक फीवर या टाइफयेडफीवर ( मन्थरकज्वरः ) ।
ग्रन्थिकज्वरः—Plague प्लेग वातालिका-अग्निरोहिणी ।
श्लेष्मकज्वरः—Influenza इन्फ्लुयेंजा ( श्लेष्मोल्वणसन्निपातः) ।
सन्धिकज्वरः—Rheumatic Fever. रियुमाटिक् फीवरः ।
श्वसनकज्वरः—Pneumonia निमोनिया (कर्कटकसन्निपातः) ।
आक्षेपकज्वरः—Cerefro-Spinal Fever. सेरिब्रो स्पाइनल फीवर ।
बृहन्मसूरिका—Small Pox, (स्मालपाक्स), लघुमसूरिका—Chicken Pox (चिकनपाक्स), रोमान्तिका-Measles. (मीजल्स) ।
दण्डकज्वरः—Dengue, डेंगू (सन्धिगसन्निपातः) ।
कर्णमूलिकज्वरः—Mumps. मम्प्स ।
विषमज्वरः—Malaria. मलेरिया ।
कालज्वरः—Kala-Azar. कालाज़ार ।

दंशमत्कुणसंक्रान्ता विज्ञेया विषमज्वराः ।"

एते जीवाणवोऽतिसूक्ष्माः प्रायः केवलचक्षुषाऽदृश्याश्च भवन्ति ।

'रक्तजा जन्तवोऽणवः, सौक्ष्म्यात्केचिददर्शनाः'

[ अ० हृ० ]

परन्तु अणुवीक्षणसहायेन चक्षुषातु दृश्यन्त एव । एतेषां दैर्घ्यं तथा विस्तार एकपर्वणः पञ्चसहस्रतमांशतः पञ्चशततमांश-पर्यन्तं भवति । इमे वायौ, जले, भूमौ, मनुष्याणामितरप्राणिनां च त्वङ्मुखमहास्रोतःसु च समुपलभ्यन्ते ।

यो मनुष्यः प्राणी वा केनचिद्विशेषसंक्रामकरोगेण समाक्रान्तः स्यात्, तस्य रुधिरलसीकासु तद्व्याधेर्विशिष्टजीवाणवः प्राप्यन्ते । ते च तच्छरीराद्बहिः उचितखाद्यादिप्रबन्धेन संरक्ष्य, परिवर्ध्य कस्यचित्स्वस्थप्राणिनः शरीरे प्रवेशिता भवेयुश्चेत्ता-र्हितत्प्राणिनि स एव रोग आविर्भवति यस्य ते जीवाणवः सन्ति ।

Indira Gandhi National
Centre for the Arts

सम्प्राप्तिकालः—शरीरे जीवाणुप्रवेशक्षणादारभ्य रोगविशेष-लक्षणोद्भवपर्यन्तं यः कालः स एव सम्प्राप्तिकाल उच्यते । अयं भिन्नभिन्नरोगेषु भिन्नभिन्नप्रकारको भवति । अस्यामवस्थायां रोगी जनः स्वस्थमनुष्येषु भयावहो भवति ।

उपसर्जनकालः—रोगशान्तिक्षणाद्यावत्कालं रोगी स्वस्थ मनुष्येषु तमेवरोगमुत्पादयितुं शक्नोति स उपसर्जनकाल इत्यु च्यते । तद्यथा—

| रोग नाम | सम्प्राप्तिकालः | उपसर्जनकालः |
|---|---|---|
| विसूचिका | १ होरातः ५ दिनपर्यन्तम् | सप्ताहद्वयम् |
| आंत्रिकज्वरः | ५ दिवसतः २० दिवसपर्यन्तम् | ६ स० |
| ग्रंथिकज्वरः | ३—१० | ३ स० |

| | | |
|---|---|---|
| शीतला | १२ | ६ स० |
| श्लेष्मकसन्निपातः | १—४ | २ स० |

## संक्रमणप्रकाराः

[ १ ] खाद्यपेयादिद्वारा संक्रमणशीला रोगाः—आन्त्रिकज्वरविसूचिकातिसाराः।

[ २ ] वायुद्वारा—मसूरिकारोमान्तिकायक्ष्मश्लेष्मकज्वराः।

[ ३ ] साक्षात्सम्बन्धेन—जलसंत्रास*धनुःस्तम्भोपदंशादयः।

[ ४ ] पिपीलिकाद्वारा—अतिसारविसूचिकाऽऽन्त्रिकज्वराः।

[ ५ ] मत्कुणद्वारा—कुष्ठकालज्वरत्वग्रोगाः।

[ ६ ] क्षुद्रपतंग ( पिस्सू ) द्वारा—ग्रंथिकज्वरः।

[ ७ ] मक्षिकाद्वारा—अतिसारप्रवाहिकाविसूचिकाऽऽन्त्रिकज्वरनेत्राभिष्यन्दाः।

[ ८ ] दंशमशकद्वारा—विषमज्वराः।

[ ९ ] यूकाद्वारा—आवर्तकज्वरः।

## संक्रमणप्रतिषेधोपायाः

तत्र अव्यापन्नानामोषधीनामपां चोपयोग [ कार्यः ],
तथा स्थानपरित्यागशान्तिकर्मप्रायश्चित्तमङ्गलजप-
होमोपहारेज्याञ्जलिनमस्कारतपोनियमदयादानदीक्षा-
भ्युपगमदेवताब्राह्मणगुरुपरैर्भवितव्यमेवं साधु भवति।

( सुश्रुतः )

* उन्मत्तश्वदंष्ट्र्या कृतेनक्षतेनाऽयं रोगः संजायते।

## ( १ ) घोषणा

यदि संक्रामकरोगेण पीडितः कश्चिन्मनुष्यः स्यादथवा तेन कस्यचिन्मृत्युर्भवेत्तर्हि सद्यः स्थानीयारोग्यविभागाध्यक्षस्तद्विषये विज्ञाप्यः । यतः स शीघ्रं संक्रमणभयमपनेतुं शक्नुयात् ।

## ( २ ) रोगिणां पृथग् रक्षणम् [ एकान्तवासः ]

संक्रामकरोगातुराणां पृथग्रक्षणं संक्रमणप्रतिषेधाय साधुतमम् । तदर्थमुपायद्वयमवलम्बनीयम् ।

[ १ ] निवासगृहे एव पृथग्रक्षणम्--एतदर्थं निम्नाङ्किता नियमाः पालनीयाः—

१—यावच्छक्यं गृहस्योपरितले रोगी रक्षणीयः ।

२—रोगिनिवासकुटीरेऽनावश्यकवस्तूनि न कदापि स्थापनीयानि ।

३—तत्र वातायनान्यनावृतानि स्युः ।

२—द्वारवातायनेषु केनचिज्जन्तुघ्नपदार्थेन व्याप्तमावरकं ( परदा ) योजनीयम् ।

५—रोगिपरिचारकातिरिक्तेन केनचिदप्यन्येन तत्र न गन्तव्यम् । कार्यकरणानन्तरं हस्तपादौ जंतुघ्नद्रवेण सम्यक् प्रक्षाल्य, वस्त्रान्तरं परिधाय परिचारकेण वहिर्गन्तव्यम् ।

६—रोगिनिवासकुटीराद् वस्त्रभाजनादिकानि जंतुघ्नपदार्थेन संशोध्य वहिर्नेतव्यानि ।

७—रोगिणो मलमूत्रष्ठीवनानि जन्तुघ्नद्रव्ययुक्तपात्रे प्रक्षेप्तव्यानि ।

[ २ ] चिकित्सालये पृथग्रक्षणम्—अयं चिकित्सालयो नगराद्वहिरेकान्ते स्यात् । तत्र प्रतिसङ्क्रामकरोगं पृथक्पृथग्गृहं

कार्यम् । यश्च रोगः सन्देहास्पदः तदर्थं पृथगेव गृहं भवेत् । प्रतिरोगिपर्याप्तस्थानादिप्रदानस्य सुव्यवस्था कार्या । चिकित्सालये रोगिणां प्रापणार्थं द्रुतयानमावश्यकम् । यावच्छक्यं प्रतिरोगं पृथक्पृथग्वाहनस्य प्रबन्धःकार्यः । रोगिप्रापणानन्तरं तद्वाहनं जन्तुघ्नद्रवेण मार्जनीयम् । रोगिसम्बन्धीनि दूषितवस्त्रमलादीनि प्रज्वालनीयानि, जन्तुघ्नद्रवेण संशोधनीयानि वा यथासम्भवमिति ।

## ( ३ ) उपदेशः

संक्रामकरोगप्रसारारम्भकाले एव स्वास्थ्यविभागाध्यक्षैरुपदेशप्रदपत्राणि तत्प्रान्तीयभाषायां मुद्राप्य वितरणीयानि । यत्र तत्सङ्क्रमणप्रतिषेधोपायाः पथ्यापथ्यादीनि च लिखितानि स्युः । तथैतस्ततः सर्वत्र तद्विषयकव्याख्यानानि कार्याणि ।

## ( ४ ) जीवाणुविनाशनम्

संक्रामकरोगीयजीवाणूनां विनाशकारकं द्रव्यं त्रिविधं भवति ।

[ १ ] जन्तुघ्नम् ( रक्षोघ्नम् ) इदं जीवाणून् मारयति ।

[ २ ] जीवाणुप्रतिरोधकम्—इदं जीवाणूनां वृद्धिं क्रियां चावरुणद्धि ।

[ ३ ] दौर्गन्ध्यनाशकम्—इदं दौर्गन्ध्यं नाशयति । इति ।

तत् पुनः त्रिधा भवति, प्राकृतिकं भौतिकं रासायनिकं चेति ।

प्राकृतिकम्—स्वच्छवायुः सूर्यरश्मिश्चेति प्रकृत्यैव रोगकरजीवाणून् विनाशयतः । सूर्यप्रकाशेनान्त्रिकज्वरयक्ष्मादीनां

जीवाणवोऽत्यल्पकालेनैव म्रियन्ते ।

भौतिकम्—इदं दहनस्वेदनभेदाभ्यां द्विविधं भवति ।

तत्र—[ १ ] दहनम्—स्वल्पमूल्यकपदार्थानां व्यर्थवस्तूनां विषये श्रेष्ठतर उपायः । रोगिणां मलमूत्रादीन्यपि दहनीयानि ।

[ २ ] स्वेदनम्—एतच्छुष्कार्द्रभेदाभ्यां द्विविधम् ।

१—शुष्कस्वेदनम्—उष्णवायुद्वारा*जीवाणवःसस्वाण्डका विनाश्यन्ते । एतच्चर्मरबरकाचवस्तूनां पुस्तकादीनां च विषये श्रेष्ठम् ।

२—आर्द्रस्वेदनम्—क्वथनवाष्पस्वेदभेदाद् द्विधेति ।

[ क ] क्वथनम्—सर्वप्रकारकजीवाणुविनाशार्थं श्रेष्ठतमो विधिरयम् । वस्त्रधातुपात्रकाष्ठनिर्मितवस्तूनां विषये भृशमुपयुज्यते ।

गृहतलादिकमपि तप्तोदकेन प्रक्षाल्य विनष्टजन्तुकं क्रियते । क्वथनार्थं होरैकाऽलम् ।

[ ख ] वाष्पस्वेदः—अयमतिविश्वसनीय आशुकृच्च विधिः । एषः अक्वथनीयगुरुपदार्थेषु प्रायेणोपयुज्यते । यतो वाष्पं सर्वत्र प्रविशति ।

रासायनिकम्—शुष्कं द्रवात्मकं वायवीयं चेति त्रिधा । तत्र शुष्के यथा—

चूर्णम्—नवीनं चूर्णं प्रायःपुरीषजीवाणुविनाशार्थं प्रयुज्यते तथा भित्तिषूपयुज्यते । निर्वापितं चूर्णमपि १ कूपोदकजीवाणुविनाशाय १५ सेटकमितमलम् ।

---

* एतदर्थं ११५ शतांशोष्णतोपयुक्ता ।

द्रवात्मके तु—पारदद्रवः, कर्पूरद्रवः सुरसाफणिज्झकार्जकनिम्बपत्रादिक्रिमिसूदद्रव्याणां क्वाथाश्चोपयोज्याः ।

वायवीये तु—गन्धकेन, निम्बपत्रेण, सोमराजिकापत्रेण, देवदारुसर्जरसादिना च धूपनं क्रियते ।

तथाचाऽऽह महर्षिसुश्रुत :—

सर्षपारिष्टपत्राभ्यां सर्पिषालवणेन च ।
द्विरन्हः कारयेद्धूपं दशरात्रमतन्द्रितः ॥
( सु० सू० अ० १९ )

## निर्जन्तुकीकरणविधिः

पुरीषं स्रावाश्च—आन्त्रिकज्वरे मलं मूत्रं च, विसूचिकायां वमनम् , अतिसारसंग्रहण्योः पुरीषम् , यक्ष्मणि, फुप्फुसविकारान्तरे च ष्ठीवनम् , रोमान्तिकाश्लैष्मिकसन्निपातयोः नासागलस्रावाश्च संक्रामका भवन्ति । अतो जन्तुघ्नद्रवयुक्तेषु केषुचिदप्रवेश्यपदार्थनिर्मितेषु पात्रेषु प्रक्षेप्य समाच्छाद्य रक्षणीयाः । १—३ होरानन्तरं जलाशयाद् दूरे पृथिव्यां गर्तं कृत्वा पाटनीयाः । समिधश्चूर्णानि मेलयित्वा प्रज्वालयेत्तर्हि अत्युत्तमता स्यात् ।

वस्त्राणिः—कार्पासवस्त्राणि जन्तुघ्नद्रवेषु प्रहरचतुष्टयं यावत्संरक्ष्य पश्चाद् घंटार्धं परिक्वाथ्य सशोष्य धारणीयानि । पूयपुरीषदूषितानि च शोधनद्रव्यमिश्रितजलेन प्रक्षाल्य पश्चात्पूर्ववत् क्वथनीयानि । कौशेयवसनानि तु सूर्यरश्मौ दिनत्रयं रक्षणीयानि । क्वथनात्तानि विनश्यन्ति ।

शवः—संक्रामकरोगेण मृतानां शवाः श्मशानप्रापणापूर्वं जन्तुघ्नद्रवाक्तेन वस्त्रेण संवेष्टनीयाः ।

गृहम्—कीटाविष्टं गृहमशेषं जन्तुघ्नद्रवेण प्रक्षालनीयं जन्तुघ्न-द्रव्येण वा धूपनीयम् । एतदवस्थायां निष्कीटनप्रकारो रोगप्रकृत्याश्रितः । यथा—विसूचिकायां मलमूत्रवमनविषये तथा तद्दूषितपदार्थेषु ध्यानं देयम् । ग्रन्थिकसन्निपाते मूषकमत्कुणाखुमक्षिकानां नाशविषये, विषमज्वरे दंशमशकानां नाशने च विशेषध्यानं देयमित्यादि ।

## (५) रोगप्रतिरोधक्षमता

यद्यपि रोगोत्पादकजीवाणवः प्रायेण वायौ जले खाद्येषुच विद्यमाना भवन्ति । अतः प्राणिनः सदैव तदाक्रमणभययुक्ता निवसन्ति । तथापि कतिपयजना एव संक्रामकरोगेण ग्रस्ता भवन्ति न तु सर्वे । अत्र हेतुः—तेषां "रोगप्रतिरोधक्षमता" इत्येव । सा क्षमता तदवस्थाया नाम यत्र शरीरावयवेषु रोगोत्पादक-जीवाणुसमाक्रमणावरोधिका शक्तिरागच्छति । इयं शक्तिः स्वाभाविकोपार्जिता चेतिद्विधा ।

स्वाभाविकशक्तिः—स्वभावत एव मनुष्येषु पशुषु च प्राप्यते, यया कीटावेशिरोगप्रभावः पराभूयते । इयं सापेक्षा भवत्यतः परिस्थितिपरिवर्तनः सम्भवोऽस्ति प्राणी रोगग्रस्तः स्यात् । यथा—स क्षुधार्तः, श्रान्तः, अपथ्यसेवी, शैत्यौष्ण्याभिभूतः, दूषितवायुसेवी च स्यात्तदेति ।

उपार्जितशक्तिः—इयं कृत्रिमोपायैरुत्पाद्यते । साच सक्रिया निष्क्रिया चेति द्विप्रकारका भवति ।

सक्रियक्षमता—तद्रोगप्रथमाक्रमणानन्तरं रोगमुक्तावस्थायां प्राप्यतेऽथवाकृत्रिमक्षते जीवाणुविषं समावेश्य समुत्पाद्यते । यथा शीतलाग्रन्थिकज्वरादौ ।

निष्क्रियक्षमता—कुतश्चित्प्राणितः प्राप्तस्य प्रतिविषस्य

जन्तुघ्नरक्तद्रव ( सीरम ) स्य शरीरान्तःप्रवेशात् प्राप्यते । सोऽयं प्रायेणाश्वात् समुपलभ्यते ।

मनुष्येषु सीरमनिर्माणार्थं किमपि विशिष्टप्रयतनं न क्रियतेऽत इयं क्षमता निष्क्रियेति निगद्यते ।

### उभयोरान्तर्यम्

सक्रियक्षमतायां रोगप्रतिरोधकशक्त्युत्पादने कालातिशयः, निष्क्रियक्षमतायां तु स्वल्पकालो लगति । सक्रियक्षमतायां रोगप्रतिरोधकशक्तिरधिककालपर्यन्तं तिष्ठति, निष्क्रियक्षमतायां तु स्वल्पकालमेव । सक्रियक्षमता रोगप्रतिबन्धकस्वरूपे प्रयुज्यते न तु चिकित्सास्वरूपे । परन्तु निष्क्रियक्षमता चिकित्सास्वरूपे प्रयुज्यते न तु प्रतिबन्धकस्वरूपे ।

Indira Gandhi National Ce... Arts

## कतिपयविशिष्टसंक्रामकरोगाणां वर्णनम्

### कुष्ठरोगः

अयं विशेषप्रकारकजीवाणुद्वारा सञ्जायते । साक्षात् सम्बन्धेनैवायं संक्रामति । मक्षिकामशकमत्कुणादिद्वाराप्येषः संक्रामतीत्येके । कुष्ठसंक्रमणावरोधार्थं निम्नाङ्किता उपाया अवलम्बनीयाः—

( १ ) नगराद्बहिः कुष्ठभवनं निर्मापणीयं यत्र सर्वे कुष्ठिनो निवसेयुः । तत्रैव चिकित्सामपि कारयेयुः । निम्नाङ्कितव्यापारार्थं न कदाप्याज्ञाप्यास्ते—

१—वीथिकासु गत्वा भिक्षाटनम् ।

२—रजकस्य कर्मकरणम् ।

३—नापितस्य कर्मकरणम् ।

४—खाद्यवस्तूनां वस्त्राणां च विक्रयणम् ।

५—कस्यचिदपि प्रकारस्यापणस्योद्घाटनम् ।
६ – वेश्यावृत्त्या द्रव्योपार्जनम् ।
७—सेवाकरणम् ।
८—सार्वजनिककूपोपरि स्नानादिकरणमित्यादि ।

अत्र कृमिघ्नरक्तशोधकद्रव्याणां सेवनं सदा कार्यम् ।

## विषमज्वरः

रोगोऽयं वायुमण्डलस्योष्णार्द्रत्वे प्रायः सम्भवति । नदीसरस्तटेषु, आर्द्रभूमौ, निम्नभूमिष्ठप्रदेशे च बाहुल्येन संजायते । भारतवर्षे सवितरि दक्षिणायने प्रायेण भवति ।

अस्योत्पत्तेः कारणं जीवाणुविशेषाः त्रिप्रकारका भवन्ति । तत्र द्वौ तृतीयकचतुर्थकोत्पादकौ मृदुकर्माणौ, तदितरोत्पादकश्च तृतीयः तीव्रकर्मा भवति ।

इमे जीवाणयो मनुष्यशरीरं प्रविश्य रुधिरेषु तिष्ठन्ति । यदा मशकाः ( प्रयोदीर्घशूकाः ) तद्रुधिरं चूषयन्ति तदा ते जीवाणवो रुधिरद्वारा तच्छरीरे गत्वामाशये लालाग्रन्थिषु च तिष्ठन्ति । यदा ते विषमज्वरकीटाक्रान्तमशका अन्यमनुष्यान् दंशयन्ते तदा तत्क्षतद्वारा तन्मनुष्यशरीरे ते जीवाणवः प्रविश्य ज्वरमुत्पादयन्ति ।

विषमज्वरप्रतिशेधार्थं निम्नलिखितविषये ध्यानं देयम् :—

( १ ) मशकदंशाद्रक्षणम्
( २ ) मशकविनाशनम् ।
( ३ ) चिकित्सा ।
( ४ ) शिक्षा ।

वासस्थानमुच्चस्थले पङ्करहिते च निर्मेयं यतो मशकाः तत्र न गन्तुं शक्नुयुः । गृहविरामदासु जालकमभितः संयोजनी-

यम्। शयनागारमुपरितले स्यात्। शय्याचतुर्दिक्षु 'मशकहरी' सम्बन्धनीया। गृहमार्गादिकं नित्यं स्वच्छीकार्यं, मलसंकरादिकं वहिः प्रक्षेप्यम्। गर्तादिकं प्रपाट्योन्नतीकार्यम्। क्वचिदपि गृह भागे मार्गादौ वा क्षुद्रगर्तेषु जलमेकत्र न तिष्ठदिति सदा ध्यानं देयम्। तमाखुपत्रदेवदारुगंधकादीनां च धूपनं कार्यम्। मृत्तैलकर्पूररसोनगंधेनापि मशका विनश्यन्ति। जले विषमज्वरजीवाणुवाहका मशका अण्डं ददत्यतस्तद्विनाशार्थं मत्स्याः प्रक्षेप्या अथवा मृत्तैलं तत्र सर्वत्र विष्टरणीयम्। यतः साण्डा मशका विनष्टा भवेयुः।

आयुर्वेदशास्त्रोक्ताः तुलसीपत्रस्वरसार्ककलिकाकुक्कुरुद्रु पल्लवकल्कमृत्युं जयवटीविषमज्वरान्तकलौहज्वरांकुशादीनां प्रयोगः कार्यः। अद्यत्वे 'कुनयन' इत्यस्य प्रयोगोऽतिलाभप्रदो दृश्यते। एतानि जीवाणून् मारयन्ति। पूर्वमेवसेवनादवरोधयन्ति च।

सर्वत्र विषमज्वरसम्बन्धिवृत्तविषये व्याख्यानं कार्यम्। यतः सर्वेजनाः पथ्यापथ्ये ज्ञात्वा स्वरक्षां कर्तुं शक्नुयुः।

## कालज्वरः

अस्य कारणंजीवाणुविशेषाः सन्ति ये प्लीह्नि वाहुल्येन निवसन्ति। यकृति रुधिरस्रोतःस्वपि प्राप्यन्ते। एषां संक्रमणं मत्कुण द्वारा रोगिभ्यःस्वस्थपुरुषेषु भवति।

रोगिणः परिवारात्पृथग्रक्षणीयाः। गृहवस्त्रादिकं सम्यक् निर्जन्तुकं कार्यम्। मत्कुणाः खट्वाभित्तिच्छिद्रभूतलच्छिद्रादिषु साण्डा निवसन्ति। ते विविधौषधोष्णोदकादिद्वारा मारणीयाः। गृहे देवदारुगन्धकादिभिर्धूपनं कार्यम्।

## ग्रन्थिकज्वरः

रोगस्यास्य कारणमेको विशेषप्रकारकः जीवाणुर्वर्तते । वस्तुतः मूषकाणां गदोऽयं मनुष्याणां तु गौणरूपः । मूषकाणां मक्षिकासु ( पिस्सुवों में ) स जीवाणुः प्रविश्य तदामाशये वृद्धिं प्राप्नोति । ता आखुमक्षिकाः पृथुकाः ( चिपटी ) पक्षरहिता उच्छलनशीला अप्रियप्रकाशाश्च भवन्ति । किंतु भूतलात् ४ हस्तोच्छ्रयादधिकं नोच्छलितुं शक्नुवन्ति । ता मक्षिका रक्तचूषणार्थं मूषकान् दशन्ति अतः जीवाणवः प्रविश्य रोगमुत्पादयन्ति ते च म्रियन्ते । एवं मूषकेषु रोगोऽयं प्रसरति । मूषका यस्मिन् गृहे निवसंति तद्गृहवासिमनुष्यानपि ता मक्षिका दंशन्ति तत्रैव पुरीषञ्चा प्युत्सृजन्ति । यदा ते मनुष्याः कण्डूयन्ते तदा तत्पुरीषस्था ग्रन्थिकज्वरजीवाणवः तद्दशनक्षतद्वारा, शरीरान्तःप्रविश्य सज्वरां वंक्षणकक्षालसीकाग्रन्थीनां वृद्धिं कुर्वन्ति ।

मूषकाणामविद्यमानताऽस्यरोगस्य प्रतिषेधोपायो मुख्यतमः । एतदर्थं गृहं दृढं चिक्कणमच्छिद्रं निर्मापणीयम् । यतो मूषका विलानि कर्तुं न शक्नुयुः । यत्र च तद्विलानि स्युः तत्र प्रस्तरादिना ऽऽच्छाद्याप्रवेश्यानि कारयेयुः । तथा मूषकविनाशार्थं विविधा उपायाः कार्याः ।

वासस्थानं स्वच्छं सप्रकाशं सदा स्यात् । मक्षिकानाशार्थं सोमराजिकापत्रनिम्बपत्रगन्धकश्रीवेष्टकैर्धूपनंकार्यम् । उपार्जितक्षमताऽपि ( टीका ) प्राप्तव्या जनैः ।

मक्षिकादंशतो रक्षार्थं हस्तपादस्कन्धादिषु सदा सर्षपतैलाभ्यङ्गो लाभकरः । यदि तत्र निम्बुतैलमपि संयोज्येत तर्हि अधिकलाभः स्यात् ।

कदाचिद् ग्रन्थिकज्वराक्रान्तवसतितः कश्चिज्जनो द्वितीय

वसतिं गच्छेच्चेत्तदा तत्प्राप्तेः पूर्वमेव तद्वस्त्रादिकं सूर्यकरे होरैकं संशोषणीयं, पश्चात् स वसतौ गच्छेदिति ।

रोगप्रसरारम्भकाले एव स्थानं परित्यज्यान्यत्र स्वास्थ्यप्रदे विवृतस्थले पर्णकुट्यां निवास उत्तमो रक्षणोपायः ।

## आन्त्रिकज्वरः

अस्य रोगस्य कारणमेको जीवाणुविशेषो भवति । अस्य संक्रमणं रोगिणां मलमूत्रष्ठीवनादीनां साक्षात् सम्पर्केण, दूषित जलदुग्धखाद्यद्वारा, मक्षिकाद्वारा जीवाणुवाहकमनुष्यद्वारा च भवति ।

अस्य प्रतिषेधार्थं निम्नांकिता उपाया अवलम्बनीयाः—

१—रोगिणो विशिष्टचिकित्सालये रक्षणीयाः । तदभावे गृह एव पृथक्कुटीरे रक्षितव्याः ।

२—तन्मलमूत्रादिकं निर्जन्तुकं कृत्वा पाटनीयम् ।

३—यानि पात्राणि रोगिणोपयुक्तानि, तानि सम्यक् निर्जन्तुकीकृत्य मार्जनीयानि ।

४—खाद्यपेयपदार्थेषु मक्षिका नोपवेशनीयाः ।

५—क्षमता प्राप्तव्या । इति ।

## श्लेष्मकसन्निपातः

अयं प्रबलसंक्रामको जनपदव्यापि रोगः । शीतकाले प्रायः सञ्जायत एषः । तदानीं पर्याप्तवस्त्राप्राप्त्याशैत्यनिवारणार्थमेकस्मिन्नेव कुटीरे वातायनकपाटानावृत्य बहवो जना मिथः संहताः सन्तः स्वपन्ति, इत्येव कारणम् ।

एतद्रोगोत्पादकजीवाणोर्निश्चयः अद्यावधि नाऽभवत् । अस्मिन् विषये भिन्नभिन्नमतानि वर्तन्ते । केचिदेकविशेषप्रका-

रकजीवाणुमेव कारणं मन्यन्ते किंचित्तु विषविशेषम्। रोगोऽयं वायुवाह्य इति सर्वैर्मन्यते। अस्य संक्रमणं रोगप्रथमावस्थायामाधिक्येन भवति। अस्य विषं रोगिणो नासागलश्वासमार्गीयनिःस्रावेषु समुपलभ्यते। अतस्तत्संक्रमणं रोगिणः साक्षात्सम्पर्केण तथा तस्य कासनच्छिक्कनवार्तालापकालेषु भवति। तत्कालकीटाविष्टवस्त्रपात्रादिद्वाराऽप्यस्य संक्रमणं दृश्यते। नास्त्येवं कश्चित्प्राणी यस्मिन्नेतद्रोगप्रतिरोधविषये स्वाभाविकं क्षमता स्यात्। रोगप्रथमावस्थायां संक्रमणशीलत्वादाशुकारित्वाद् दुरवगम्यानदानत्वाच्चास्यसंक्रमणप्रसारावरोधस्य नास्ति कश्चन विशेषोपायः। अतो विश्वव्यापिसंक्रमणकाले यदि स्वल्प ज्वरोप्यनुभवगम्यः स्यात्तदानीमेव स रोगी पृथक् सुप्रकाशित वाताक्रान्तकुटीरे रक्षणीयः। रोगिणः कासनादिकाले मुखसमक्षे वस्त्रं योजनीयम्। तच्च निर्जन्तुकं कार्यम्। रोगिस्रावदूषितानि वस्त्राणि वस्त्वन्तराणि च निर्जन्तुकीकार्याणि। रोगिनिवास कुटीरोऽपि निर्जंतुकीकार्यः। तदानीं नाट्यालयसम्मेलनादौ जनानां गमनं निषेधनीयम्। यतो जनसमुदायः एकत्र न स्थातुं शक्नुयात्। श्लेष्मकसन्निपातावरोधार्थं पञ्चाशत्तोलकोष्ण-जलेऽर्धतोलकलवणं घोलयित्वा तस्य कवलगण्डूषद्वारा गल-संशोधनं तथा नस्यद्वारा नासागुहासंशोधणं दिवा त्रिचतुर्वारमवश्यं कार्यम्।

## शोषः *

शोषो राजयक्ष्मा, यक्ष्मा, क्षय इत्यपरपर्यायः।
अयं खलु परमभयङ्करोऽतिप्राचीनः संक्रामको रोगः।
यो हि फुप्फुसयोः कीटाणुविशेषाणां स्थित्योत्पद्यते।

---

टि० * काशी हिंदूविश्वविद्यालयीयशास्त्राचार्यपरीक्षासमित्या

## क्षयरोगाक्रमणे मुख्यतःकारणत्रयम्

( १ ) जीवाणवः ( २ ) शरीरशक्तिह्रासकारककर्माणि (३) अशुद्धवायुसेवनमिति।

शरीरं हि क्षेत्रं जीवाणवश्च बीजम्। यदा वपनयोग्यं क्षेत्रं भवति तदैव बीजवपनादंकुर उत्पद्यते। एवं यदा शरीरं वेग-रोधधातुक्षयसाहसविषमाशनैः शरीरशक्तिह्रासकारककर्मभिः क्षीणं, निर्बलं भवति जीवाणवश्चाशुद्धवाय्वादिद्वारा तत्राधिकुर्वन्ति चेत्तदा क्षयरोग उत्पद्यते।

## शरीरे क्षयोत्पादककीटाणूनां प्रवेशप्रकाराः

( १ ) श्वासेन सार्धं फुप्फुसे गमनं जीवाणूनाम्।

( २ ) एवम्भूतस्याशनस्य भक्षणं यत्र क्षयरोगोत्पादकजीवा-णवः सम्मिलिताः स्युः। यथा क्षयपीडितपशूनां मांसमथवा क्षीर-मथवाऽन्यद्भोज्यंवस्तु यत्र क्षययुक्तवस्तूनां संस्पर्शः स्यात्।

( ३ ) व्रणद्वारा रुधिरे कीटाणुप्रवेशः।

एवत्त्रिप्रकारेभ्यः शरीरं क्षयकीटाणवः प्रविशन्ति।

तत्र प्रथमः सर्वापेक्षया मुख्य इति प्रतीयते।

**श्वासद्वाराकीटाणुप्रवेशः**—क्षयपीडितजनानां मुखात् ष्ठीवनेन सहासङ्ख्याः कीटाणवो निःसरन्ति। इदं ष्ठीवनं यदेत-स्ततः पतितंसत् शुष्कीभवति तदा चूर्णरूपतां गच्छति। तच्चूर्णञ्च वायुनाप्रक्षिप्तं पांसुभिर्मिश्रितम्भवति। यो हि मनुष्य एवम्भूते पांसुमिश्रिते वाते श्वसिति, यदि तस्य शरीरे [ कुस्वास्थ्यात् ]

---

स्वीकृतस्य १९२७ ई० स्वलिखितस्य यक्ष्मनिबन्धाख्यग्रन्थस्यांशोऽय-मुद्धृतोऽत्र।

कीटाणूनामधिकारो भवेत्तह्यवश्यं स क्षयरोगाक्रान्तःस्यात्। मातापितृदोषान्मद्यादिमादकद्रव्यसेवनाद्रोगान्तरात्कुतश्चित्स्वास्थ्यनाशककर्मतो वा यदा शरीरं निर्बलम्भवति तदैवैतेषां कीटाणूनामधिकारस्तत्तन्निमित्ताज्जायते तत्र।

इतस्ततःप्रक्षिप्तष्ठीवनादतिरिक्तं रोगिणः कासेन उच्चैः सम्भाषणेन क्षवथुना वा साकं यःष्ठीवनांशो वहिरायाति सोऽपि तत्समीपवर्तिनां मनुजानां परमहानिकरः। एवं तेऽपि क्षयरोगाक्रान्ताः भवन्तीति स्पष्टं सिद्धम्। अतो रोगिणामतिसन्निकटे चिरकालं न स्थातव्यं कैश्चित्। द्वित्रिहस्तान्तरंस्थित्या तु नास्ति भयं यतस्ते सूक्ष्माःकीटाणवो ये ष्ठीवनेन सह कासक्षवथूच्चैर्भाषणतो मुखाद्बहिरायान्ति ते हस्तद्वयान्तरादग्रेन गन्तुं शक्नुवन्ति शीघ्रञ्च भूमौ पतन्ति। परन्तु तत्सामान्यं भयमपि यत्कीटाणुयुक्तष्ठीवनस्य भूम्यापतनेनोत्पन्नं स्यादवश्यमपनेतव्यम्। ते कणा रजोयुक्ता वायौ न मिश्रिता भवेयुः। यक्ष्मिणेत्यवश्यं ज्ञातव्यं यत्तस्य ष्ठीवनं शुष्कं भूत्वा चूर्णरूपत्वं न गच्छेत्। यतश्चूर्णत्वेनैव क्षयस्य प्रसारो भवति वाहुल्येन। अत आर्द्रमेवष्ठीवनं सावधानतया नष्टं कुर्यात्। एतदर्थं रोगिणा सर्वदा धातुनिर्मिते कस्मिंश्चित्प्रतिग्रहे [ ष्ठीवनपात्रविशेषे ] ष्ठीवनीयम्। एतत्पात्रंकेनचित्परिशोधकद्रवपदार्थेन [ यथा 'चूना, पोटाशपरमेगनेट' अथवा 'कार्वोलिकलोशन' इत्येतद्युक्तजलेन ] अर्द्धं पूर्णं स्यात्। यतः ष्ठीवनं न शुष्येत्। तं प्रतिग्रहं भूमितलाद् द्विहस्तोच्चैः कस्मिंश्चिदाधारे स्थापयेत्। यतो मार्जारिकाश्वादयस्तत्र मुखं न प्रक्षिपेयुः। तद्द्वारा च क्षयप्रसारो न स्यात्। प्रतिग्रहश्चाच्छादनेनाच्छादितं सदा रक्षेत्। एवंकृते मक्षिकादयोऽपि तत्र नोपविशन्ति। तद्द्वारेण च क्षयप्रसारभयं न भवति। यत इति सिद्धमेव यन

मक्षिकाकीटपतंगादयः स्वपादद्वारा ष्ठीवनकणान् नीत्वा यस्मिन् वस्तुनि तिष्ठन्ति तत्क्षययुक्तं भवति। तद्भक्षणेन च प्राणिनः क्षयरोगाक्रान्ता भवन्ति। अथवा क्षयाक्रान्तमक्षिकादयःकीटा मृत्वा शुष्काःसन्तो रजसि मिश्रिता भवन्ति। तन्मिश्रितंरजो वायुना सह फुप्फुसे श्वासद्वारा गच्छति क्षयञ्चोत्पादयति। यदा रोगी गृहाद्बहिर्गच्छेत्तदा स्वेनसहैकं जेबीयं प्रतिग्रहं नयेत्। यद्येवं न सम्भवेत्तु कस्मिंश्चिद्वस्त्रके [ रूमाले ] ष्ठीवेत्। अन्यत्र न ष्ठीवेत्। तद्वस्त्रं चार्द्रमेवदाहयेदथवा कस्मिंश्चित् पात्रेधृत्वा तस्मिन् जलं शोधकद्रव्यं शुक्तसोडाद्यन्यतमंच प्रक्षिप्य सम्यक् क्वाथयेदेवंचतुर्विंशतिघण्टामध्येऽवश्यमेकदा कुर्यात्। तद्वस्त्रपात्रादिकं संशोध्य कार्ये प्रयोजयेत्। निखिलंप्रतिग्रहस्थष्ठीवनमपि नित्यसन्निहित एकस्मिन्जलपूर्णघटे प्रक्षिप्य क्वथेत्। एकस्मिन्नहोरात्रेऽवश्यमेकदा क्वथेत्। ईषत्कालं क्वथनेनैव कीटाणवो म्रियन्ते। ष्ठीवनञ्चाऽहानिकरम्भवति। क्वाथ्यजलेन सह शुद्धसर्जिका [ सोडा ] दिकशोधकद्रव्यमवश्यं प्रक्षिपेत्। यद्वस्त्रंसिंहाणकादिप्रोक्षणार्थमुपयुज्यते तत्ष्ठीवनेन न स्पृष्टंस्यात्। ष्ठीवनार्थमन्यद्वस्त्रं रक्षेत्।

**कासनम्**—क्षयी कासवेगंनावरुन्ध्यान्नच मुधा कासेत। कासवेगादागतं कफं न निगिलेदेवंकृते अन्त्राण्यपि रोगान्वितानि शीघ्रं भवन्ति। तथा कासावसरे स्वसम्मुखे वस्त्रं धृत्वा कासेत। यतःष्ठीवनकणा अन्यत्र न पतेयुः।

**मक्षिकादमनावश्यकता**—यावच्छक्यं रोगिनिवास स्थाने मक्षिकाऽनागमनस्य प्रबन्धो विधेयः। यत एता एव क्षयकीटाणून् प्रसारयन्ति। अतः सजालकपटेन रोगिद्वारमाच्छादितं

तिष्ठेत् सदा। तथा रोगिनिवासस्थानसकाशेऽशुद्धदुर्गन्धिपदार्थराशिर्नस्यात्। सर्वतः स्वच्छता स्यात्।

रोगिणोपयुज्यमानानां वस्त्रादीनां शुद्धिः सावधानतया सर्वदा कार्या। निवासस्थानस्य भूमेरुपरि जलं प्रक्षिप्य पश्चान्मार्जन्या शनैः शनैः मार्जयेदन्यथोड्डीयमानपांसुभी रोगी, अन्ये च तत्रवर्तिनो रोगाक्रान्ता भवितुं शक्नुवन्ति।

**अशनद्वाराकीटाणुप्रवेशः**—यदाऽशनं क्षयजनककीटाणुयुक्तम्भवति तदशनञ्च योऽश्नाति तस्यामाशयेऽशनद्वारा कीटाणवो गच्छन्ति। प्रायःक्षयरोगाक्रान्तपशूनां क्षीरपानेनाथवातन्मांसभक्षणेनैतत्सम्भवति। यतः पशूनामपि क्षयरोगोजायते। पशुक्षयकारकाः कीटाणवः मानवक्षयकारककीटाणुभ्यो विभिन्ना भवन्ति। पाशविकक्षयस्याक्रमणं मनुष्येषु भवतीति सिद्धमेव अतो मांसाहारिणां यद्येतन्निश्चितं न स्याद्यदिदं मांसं [परीक्षया सिद्धम्] निर्दोषं वर्तते तु तैः सम्यक् तन्मांसं क्वथनीयम्। एवङ्कृते निखिला हानिकाराः क्षयकीटाणवो विनष्टा भवन्ति। क्षययुक्तपशूनां तु मांसं क्षीरञ्च सर्वथा त्याज्यम्। पशूनामपि परीक्षा सततं वैद्यद्वारा कार्या। रोगी पशुः पृथक् कार्यः। आभीरैरन्यपशुपालकैश्च सदाऽस्मिन् विषये ध्यानं देयम्। दुग्धदोहनोपयुज्यमानं पात्रमपि सदा उष्णोदकेन परिशोध्य स्थापनीयम्।

क्षयान्वितपशूनां क्षीरस्य पानेन क्षयाक्रान्ता भवन्ति जनाः। अतः सन्देहे सति सम्यक् क्वथित्वा पिबेत्। प्रायः शिशुभ्यो परमलाभकरस्वमातृदुग्धाभावे गोक्षीरं दीयते। यतो मातृदुग्धातिरिक्तं गवामपिक्षीरं हितकरं भवति। अतो गवां परीक्षां कारयित्वा तासां क्षीरं पाययेत्। सन्देहे सति क्षीरं तावदुष्णीकुर्याद्यावत्तस्मिन् सम्यग्बुद्बुदान्युत्तिष्ठेयुः। पश्चाच्छीतीकृत्य शिशुभ्यः पाययेदिति।

**चुम्बननिषेधः**—प्रायो जनाः श्वमार्जारिकाशुकसारिकादिकं पालयन्ति । संम्भवोऽस्ति ते क्षयान्विताः स्युः । अतस्तेषां चुम्बनमनुचितम् । क्षयाक्रान्तानां मनुजानामपि चुम्बनं न तत्कुटुम्बिभिर्मित्रैर्वा कार्यम् । यतस्तन्मुखागतष्ठीवनस्य स्वमुखप्रवेशाद्न्त्राणि क्षयान्वितानि भवितुं शक्नुवन्ति ।

**धार्मिकगोष्ठीद्वारा प्रचारः**—भिन्नभिन्नधर्मावलम्बिनो भिन्नभिन्नजातीया वा यदा स्वगोष्ठीं कुर्वन्ति । तदा प्राय एकस्मिन्नेव पात्रे वहवो जना जलादिकं पिबन्ति । एतन्महदनुचितं सम्भवोऽस्ति कश्चिदज्ञातः क्षयरोगी स्यात्तत्र तन्मुखादागतं पात्रलग्नं ष्ठीवनमन्यस्य स्वस्थस्य मुखाभ्यन्तरे गच्छेदेवं सोप्याक्रान्तः स्यात्क्षयेणेति । अतस्तत्र पृथक् पृथक् मृत्तिकाशरावे हस्तसम्पुटे वा पिवेत्तु वरं स्यात् ।

**व्रणद्वारा रुधिरेकीटाणुप्रवेशः**—यःखलु क्षयरोगिणां प्रतिग्रहं परिमार्ष्टि तस्य यदि कदाचित् धातुमृत्काद्यन्यतमनिर्मितप्रतिग्रहद्वारा क्षतं स्यात्तु कीटाणवस्तद्द्वारा रुधिरे प्रविष्टा भवन्ति । तथाऽन्येऽपि क्षयरोगिणां परिचारकाः सुहृदो वा यदि व्रणिताः स्युः रोगिसन्निकटे चोपविष्टाः स्युः तद्व्रणे रोगिष्ठीवनकणा असावधानतया वाय्वादिद्वारा कथञ्चिदपि पतेयुश्चेत्तुतेषां रुधिरे कीटाणवः प्रविष्टा भवन्ति । क्षयरोगचिकित्सकानामपि, असावधानतया भयंसम्भवति यदि क्षयिस्पृष्टयन्त्रद्वारा तेषां क्षतं स्यात् । अतो विशेषेण चिकित्सकाः, क्षयिपरिचारकाः, मित्राणि कुटुम्बिनश्च सावधानाः स्युः ।

कदाचिद् रोगी यदि स्वकुटुम्बिनो बालकादेः क्षते स्वष्ठीवनं लिम्पेदथवा कस्यचिच्छिशोः क्षताङ्गुलिं स्वमुखे प्रवेशयेत्तुतत्क्षतद्वारा कीटाणवो रुधिरे प्रविष्टा भवन्ति ।

रोगिणैतद् ज्ञातव्यं यत्कस्यचिदपि शिश्वादेरेवं स्पर्शं न कुर्यात्। इदमपि सदा ज्ञेयं यत्क्षयिणां भोजनपानाद्यर्थोपयुज्यमानं पात्रमन्येषामुपयोगे नाऽऽयात्। यावद्दुष्णोदकेन सम्यक्छुद्धीकृतं न स्यात्। एवं वस्त्रादिविषयेऽपि ज्ञेयं सर्वैः।

## अन्ये क्षयरोगप्रचारहेतवः

( १ ) मातापितृभ्यामपि स्वसतन्तौ क्षयरोग. सङ्क्रामति। अर्थात् सहजोपि भवति क्षयरोगः। किन्तुसोऽसाध्य एव न ज्ञातव्यः प्रत्युत नव्यक्षयवत् साध्य एव ज्ञेयः। प्रायः एवमत्यल्पं भवति। तद्वक्षः संकुचितं भवति अंसौ चावनतौ भवतः। यदाकदा शनैः २ दौर्वल्यं वर्धमानं दृश्यत इति। यदा हि शिशूनां क्षयो जायतेकदाचित्तदाप्रायःसर्वदैताहिनिम्नाङ्किताानिकारणान्युपलभ्यन्ते।

१—बालकःक्षयार्तमातुरन्यस्य कस्यचिद्यक्ष्मिणो वा सकाशे सुप्त आसीत्।

२—अथवा चिरकालं तत्सन्निकटे स्थित आसीत्

३—अथवा बालकस्य मुखं चुम्बितमासीद्रोगिणा

४—अथवा स दूषितकीटाणुयुक्ते मलिने विष्टरे स्थले वाऽक्रीडत्।

इत्यादिहेतुभिरवगम्यते यत् वाल्यावस्थात एव स्वच्छतायाः स्वास्थ्यरक्षणनियमपालनस्य च परमावश्यकता।

या मातास्वकीयायांभाविन्यां सन्ततौ यक्ष्मण आशङ्कां कुर्यात्। तया स्वसुस्वाथ्यसम्पादनार्थं सदा प्रयतनं कार्यम्। यथा सततं शुद्धवाते निवसेत्, नित्यं पुष्टिकरं भोजनं कुर्वीत। सा कदाचिदप्येवं वस्त्रं न दधीत येन तद्वक्षः सङ्कुचितं स्याच्छ्वासेऽपि वाधाऽऽगच्छेत्। पाश्चात्यदेशीयानामिव प्रत्यङ्गनि-

बद्धं वस्त्रं न दधीतेति तात्पर्यम् । ईषच्छिथिलमेव धारयेद्येन प्राकृतकार्येऽपि क्षति र्न स्याच्छ्वासादिबाधापि न भवेत् ।

अत्र विचार्यं यत्सततं स्वास्थ्यरक्षाकरमतिप्राचीनं कीदृशं महर्षिप्रचारितं भारतीयं वस्त्रधारणविधानम् ?

( २ ) मादकवस्तूनामत्यधिकसेवनम ।

( ३ ) मैथुनाधिक्यम्, बाल्यावस्थायामेव विवाहः, तथा सर्वस्मिन् कर्मणि स्वसामर्थ्यातिरिक्तपरिश्रमकरणम् ।

( ४ ) कतिपयरोगाः सन्ति यद्धेतोः शरीरं दुर्बलम्भवति । यथा श्वसनकान्त्रिकज्वरविस्फोटकोपदंशप्रतिश्यायातिसारादयः ।

( ५ ) कतिपयव्यापारद्वाराण्येवम्भूतानि सन्ति यत्र विविध प्रकारेण रजांसि कार्यकर्तॄणां देहे श्वासेन सह गच्छन्ति यथा पेषणकार्यालयः पाककार्यालयः, धूमवर्तिकार्यालयः, काष्ठलौहादि-धातुकार्यालयः तथा मद्रणसीवनादिकार्यालयश्चेत्यादि ।

( ६ ) दारिद्र्यम्, अपूर्णभोजनोपलब्धिः अतो बाल्यावस्थात एव श्रमजीविता ।

( ७ ) स्वास्थ्यनाशकगृहाणि, यत्र तमसो बाहुल्येनाधिकारः, सूर्यप्रकाशो न गच्छति वायु र्न च सम्यगायाति । येषां परिमार्जनं न क्रियते । यत्र च बहूनि जीर्णशीर्णवस्तूनि कुप्रबन्धेन रक्षितानि सन्ति ।

( ८ ) सार्वजनिकभोजनालयः—अत्र बहवो जना द्रव्यं दत्वा भुञ्जते । कदाचित्संक्रामकरोगिणोऽप्यागत्य भोजनं कुर्वन्ति । अत्र स्वास्थ्यरक्षायाः तादृशं प्रयोजनं न भवति यादृशं द्रव्यस्य । कदाचित्पाचकाःपरिवेषका अपि रोगिणो भवन्ति । प्रायस्तत्रैव ष्ठीवनादिकमपि प्रक्षिपन्ति धूममपि पिबन्ति जनाः । अतो यक्ष्म-संक्रमणं भवति । अतएव प्राचीनै र्निर्दोषा 'स्वयम्पाकिता' प्रचारिता ।

एतैः ( उपरोक्तैः ) कारणैः यक्ष्मसमावेशो भवति हतभाग्यानां मनुजानां देहे। अतो ह्येतत्परित्यागे प्रयतितव्यं सर्वैः सर्वदा। चतुर्दशवर्षवयस्तो न्यूनावस्थायां बालकै र्न किमपि कार्यं श्रमशीलं द्रव्याद्युपार्जनार्थं करणीयम्। नानारजोमयकार्यालये कार्यकर्तॄणामिदं कर्तव्यं यत्सर्वदा धूलितो रक्षार्थमुपायान् कुर्युर्यथा श्वासग्रहणार्थमुखनासिकयोरुपरिवस्त्राच्छादनकं धारयेयुस्तथा नासिकामुखाभ्यां रजो निष्कासयेयुः। दन्ताभ्यन्तरतः पिष्टरजांसि विघृष्य पृथक् कुर्युः। एवंकृते लालासंयोगेनोत्पद्यमानो माधुर्य्यविशेषो (Clucose) न सम्भवति योह्यपद्रविकीटाणुप्रसारणार्थमेक आवश्यकः पदार्थः। तथा अवकाशावसरे शुद्धवातादिसेवनस्य सम्यक् प्रबन्धं कुर्युः। मादकवस्तूनि परित्यजेयुः। स्वास्थ्य नियमानुकूलं सदाऽऽचरेयुः।

## हितोपदेशाः

वेगरोधधातुक्षयसाहसविषमाशनपरित्यागविषये सदा ध्यानं रक्षणीयं सुप्रकाशवातागमनशीले स्थले निवासः कार्यः। पवित्रभोजनकरणे धर्मपरतायां च सदा प्रयतनीयम्।

तथाहि—

ब्रह्मचर्येण दानेन तपसा देवतार्चनैः।
सत्येनाचारयोगेन मङ्गलैरविहिंसया॥
वैद्यविप्रार्चनाच्चैव रोगराजो निवर्तते। (च० चि० अ० ८)

अन्यच्च—

सत्येनाचारयोगेन रविमण्डलसेवया।
वैद्यविप्रार्चनाच्चैव रोगराजो निवर्तते॥

( योगरत्नाकरः )

इति

# विसूचिका

अस्य रोगस्योत्पादका जीवाणुविशेषाः सन्ति। ये शरीरं प्रविश्य विसूचिकामुत्पादयन्ति। रोगोऽयं विशेषतः जलद्वारा प्रसरति। नदीकूपादीनां जलं विसूचिकारोगातुराणां मलेन दूषितं भवति। एवम्भूतेन जलेन शाकादिकं यद्यपक्वं भुज्यते सद्यः रोगः संजायते। मक्षिकाद्वाराप्ययं प्रसरति। इमा विसूचिकातुराणां मलमूत्रोपर्युपविश्य स्वमुखपादद्वारा जीवाणून समाहृत्य क्षीरजलभोजनादौ प्रक्षिपन्ति। ये जनाःतत्पदार्थं सेवन्ते ते विसूचिकाक्रान्ता भवन्ति। कदाचिदेतद्रोगजीवाणु-वाहकमनुष्यद्वाराऽप्ययं संक्रामति।

विसूचिकातुराः सद्यो विशिष्टचिकित्सालये प्रेषणीयाः।

रोगिमलं सम्यग् जन्तुघ्नद्रव्यद्वारा निर्जन्तुकीकृत्य पृथिव्यां पाटनीयं, प्रज्वालनं तु ततोऽपि श्रेष्ठतरम्। यो जनपदः विसूचिकाक्रांतः, तस्य जलप्रबन्धंप्रति विशेषध्यानं देयम्।

कूपे जन्तुघ्नपदार्थाः (चूर्णपोटाशियमपरमेंगनटप्रभृतयः) प्रक्षेप्याः।

जलं संक्वाथ्य वस्त्रपूतं च कृत्वा सर्वदा पेयम्।

सर्वप्रकारकं भोजनं परिपाच्य कोष्णमेवाहरणीयम।

पर्युषितं भोजनं न कदापि कार्यम्।

वैपणिकं मिष्टान्नादिकं न कदापि भोज्यम्। यतोऽनावृत पात्रेषु संरक्षणान्मक्षिकाद्वारा तद् दूषितं भवति।

सर्वे खाद्यपदार्था आच्छाद्य रक्षणीयाः।

क्षीरमपि संक्वाथ्य पेयम्।

भोजनपात्राणि उष्णजलेन मार्जनीयानि।

नियतसमये हितमितभोजनं कार्यम्।

वमनविरेचनकारकद्रव्याणां सेवनं न कार्यम्।

उपार्जितक्षमता (टीका) प्राप्तव्या ।

अरुणमरिचेक्षुरससीधुपलाण्डूनां सेवनं, कर्पूराघ्राणं विशेषलाभप्रदं भवति ।

विसूचिकारोगप्रसरणसमये निम्बपत्रशुद्धहिंगुकर्पूराणां गुटिकां कृत्वा प्रातर्नित्यसेवनाद्विसूचिकाबाधा न भवति ।

विसूचिकारोगेण मृता वसतितो दूरे जलाशयासमीपे तीव्राग्नौ दहनीयाः । तदशक्तौ तु भूमौ चतुर्हस्तगभीरे गर्ते पातनीयाः ।

## मसूरिका (शीतला)

अस्य रोगस्याक्रमणविधिः पूर्णतयाद्यावधि नाऽवगतो विद्वद्भिः । किन्तु रोगोऽयं वायुवाह्य इति सर्वेषां विश्वासः । स च श्वासनिःश्वासद्वारा शरीरं प्रविशति । अस्य जीवाणवो नाधिगताः कैश्चित् । अस्य विषं त्वक्पिटिकासु, मुखस्रावेषु च प्राप्यते । तच्च वायुद्वारा सुदूरं परिसर्पति ।

यदा त्वक्पिटिकाः शुष्यन्ति तदा तासां त्वग्भागा इतस्ततो वायुद्वारोत्पतन्तः संक्रामन्ति ।

रोगिविष्टराद्यन्यपदार्थद्वाराऽप्ययं संक्रामति ।

अस्य संक्रमणावरोधार्थं रोगिणः पृथगेकान्ते रक्षणीया ।

रोगिसम्बन्धीनि सर्वाणि वस्तूनि सम्यक् निर्जन्तुकीकार्याणि ।

एकादशनिम्बपत्राणि त्रिमरिचैः सहैकप्रसृतजले संपेष्य नित्यं प्रातःपानं मसूरिकाप्रतिषेधकम् ।

उपार्जितक्षमता ( टीका ) प्राप्तव्या ।

# जनपदोद्ध्वंसने कारणानि

अथातो जनपदोद्ध्वंसनीयं विमानं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

जनपदमण्डले पञ्चालक्षेत्रे द्विजातिवराध्युषितायां काम्पिल्यराजधान्यां भगवान्पुनर्वसुरात्रेयोऽन्तेवासिगणपरिवृतः पश्चिमे घर्ममासे गंगातीरे वनविचारमनुविचरन्शिष्यमग्निवेशमब्रवीत् ॥३॥

दृश्यन्ते हि खलु सौम्य ! नक्षत्रग्रहचन्द्रसूर्यानिलानलानां दिशां च प्रकृतिभूतानामृतुवैकारिका भावाः, अचिरादितो भूरपि च न यथावद्रसवीर्यविपाकप्रभावमोषधीनां प्रतिविधास्यति, तद्वियोगाच्चातङ्कप्रायता नियताः, तस्मात्प्रागुद्ध्वंसात्प्राक्च भूमेर्विरसीभावादुद्धरध्वं सौम्य ! भैषज्यानि यावन्नोपहतरसवीर्यविपाकप्रभावाणि भवन्ति, वयं चैषां रसवीर्यविपाकप्रभावानुपयोक्ष्यामहे, ये चास्माननुकाङ्क्षन्ति, यांश्च वयमनुकाङ्क्षामः, नहि सम्यगुद्धृतेषु भैषज्येषु सम्यग्विहितेषु, सम्यग्विचारचारितेषु जनपदोद्ध्वंसकराणां विकाराणां किंचित्प्रतीकारगौरवं भवति ॥४॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच—उद्धृतानि खलु भगवन् ! भैषज्यानि विहितानि च सम्यक् सम्यग्विचारचारितानि च, अपि तु खलु जनपदोद्ध्वंसनमेकेनैव व्याधिना युगपदसमानप्रकृत्याहारदेहबलसात्म्यसत्त्ववयसां मनुष्याणां कस्माद्भवतीति ॥५॥

तमुवाच भगवानात्रेयः—एवमसामान्यानामेभिरप्यग्निवेश ! प्रकृत्यादिभिर्भावैर्मनुष्याणां येऽन्ये भावाः सामान्यास्तद्वैगुण्यात्समानकालाः समानलिङ्गाश्च व्याधयोऽभिनिर्वर्तमाना जनपदमु-

द्धवंसयन्ति, ते तु खल्विमे भावाः सामान्या जनपदेषु भवन्ति, तद्यथा—वायुरुदकं देशः कालः इति ॥६॥

तत्र वातमेवंविधमनारोग्यकरं विद्यात् तद्यथा—यथर्तुविषममतिस्तिमितमतिचलमतिपरुषमतिशीतमत्युष्णमतिरूक्षमत्यभिष्यन्दिनमतिभैरवारावमतिप्रतिहतपरस्परगतिमतिकुण्डलिनमसात्म्यगन्धबाष्पसिकतापांशुधूमोपहतमिति ॥७॥

उदकं तु खलु—अत्यर्थविकृतगन्धवर्णरसस्पर्शवत्क्लेदबहुलमपक्रान्तजलचरविहंगमुपक्षीणजलाशयमप्रीतिकरमपगतगुणं विद्यात् ॥८॥

देशं पुनः—विकृतवर्णगन्धरसस्पर्शं क्लेदबहुलमुपसृष्टं सरीसृपव्यालमशकशलभमक्षिकामूषकोलूकश्माशानिकशकुनिजम्बुकादिभिस्तृणोलूपोपवनवन्तं लताप्रतानादिबहुलमपूर्ववदवपतित शुष्कनष्टसस्यं धूम्रपवनं प्रध्मातपतत्त्रिगणमुत्क्रुष्टश्वगणमुद्भ्रान्तव्यथितविविधमृगपक्षिसंघमुत्सृष्टनष्टधर्मसत्यलज्जाचारशीलगुणजनपदं शश्वत्क्षुभितोदीर्णसलिलाशयं प्रततोल्कापातनिर्घात भूमिकम्पमतिभयारावरूपं रूक्षताम्रारुणसिताभ्रजालसंवृतार्कचन्द्रतारकमभीक्ष्णं ससंभ्रमोद्वेगमिव सत्रासरुदितमिव सतमस्कमिव गुह्यकाचरितमिवाक्रन्दितशब्दबहुलं चाहितं विद्यात् ॥९॥

कालं तु खलु—यथर्तुलिङ्गाद्विपरीतलिंगमतिलिंगं हीनलिंगं चाहितं व्यवस्येत् ॥१०॥

इमानेवंदोषयुक्तांश्चतुरो भवान् जनपदोद्ध्वंसकरान् वदन्ति कुशलाः, अतोऽन्यथाभूतांस्तु हितानाचक्षते ॥११॥

विगुणेष्वपि तु खल्वेतेषु जनपदोद्ध्वंसनकरेषु भावेषु भेषजनोपपाद्यमानानामभयं भवति रोगेभ्य इति ॥१२॥

भवन्ति चात्र

वैगुण्यमुपपन्नानां देशकालानिलाम्भसाम् ।

गरीयस्त्वं विशेषेण हेतुमत्संप्रवक्ष्यते ॥ १३ ॥
वाताज्जलं, जलाद्देशं, देशात्कालं, स्वभावतः ।
विद्याद् दुष्परिहार्यत्वाद् गरीयस्तरमर्थवित् ॥ १४ ॥
वाय्वादिषु यथोक्तानां दोषाणां तु विशेषवित् ।
प्रतीकारस्य सौकर्ये विद्याल्लाघवलक्षणम् ॥ १५ ॥
चतुर्ष्वपि तु दुष्टेषु कालान्तेषु यदा नराः ।
भेषजेनोपपाद्यन्ते न भवन्त्यातुरास्तदा ॥ १६ ॥
येषां न मृत्युसामान्यं सामान्यं न च कर्मणाम् ।
कर्म पञ्चविधं* तेषां भेषजं परमुच्यते ॥ १७ ॥
रसायनानां विधिवच्चोपयोगः प्रशस्यते ।
शस्यते देहवृत्तिश्च भेषजैः पूर्वमुद्धृतैः ॥ १८ ॥
सत्यं भूते दया दानं बलयो देवतार्चनम् ।
सद्वृत्तस्यानुवृत्तिश्च प्रशमो गुप्तिरात्मनः ॥ १९ ॥
हितं जनपदानां च शिवानामुपसेवनम् ।
सेवनं ब्रह्मचर्यस्य तथैव ब्रह्मचारिणाम् ॥ २० ॥
संकथा धर्मशास्त्राणां महर्षीणां जितात्मनाम् ।
धार्मिकैः सात्त्विकैर्नित्यं सहास्या वृद्धसंमतैः ॥ २१ ॥
इत्येतद् भेषजं प्रोक्तमायुषः परिपालनम् ।
येषामनियतो मृत्युस्तस्मिन्काले सुदारुणे ॥ २२ ॥

इति श्रुत्वा जनपदोद्ध्वंसने कारणान्यात्रेयस्य भगवतः पुनरपि भगवन्तमात्रेयमग्निवेश उवाच—अथ खलु भगवन्! कुतो मूलमेषां वाय्वादीनां वैगुण्यमुत्पद्यते? येनोपपन्ना जनपदमुद्ध्वंसयन्तीति ॥ २३ ॥

---

* स्नेहस्वेदपूर्वकवमनविरेचनास्थापनानुवासनशिरोविरेचनानीति पञ्चविधम् ।

तमुवाच भगवानात्रेयः—सर्वेषामप्यग्निवेश ! वाय्वादीनां यद्वैगुण्यमुत्पद्यते तस्य मूलमधर्मः, तन्मूलं वासत्कर्म पूर्वकृतं, तयोर्योनिः प्रज्ञापराध एव। तद्यथा—यदा देशनगरनिगमजनपदप्रधाना धर्ममुत्क्रम्याधर्मेण प्रजां वर्तयन्ति, तदाश्रितोपाश्रिताः पौरजनपदा व्यवहारोपजीविनश्च तमधर्ममभिवर्धयन्ति, ततः सोऽधर्मः प्रसभं धर्ममन्तर्धत्ते, ततस्तेऽन्तर्हितधर्माणो देवताभिरपि त्यज्यन्ते, तेषां तथाऽन्तर्हितधर्माणामधर्मप्रधानानामपक्रान्तदेवतानामृतवो व्यापद्यन्ते, तेन नापो यथाकालं देवो वर्षति न वा वर्षति विकृता वा वर्षति, वाता न सम्यगभिवान्ति, क्षितिर्व्यापद्यते, सलिलान्युपशुष्यन्ति, ओषधयः स्वभावं परिहायापद्यन्ते विकृतिं, तत उद्ध्वंसन्ते जनपदाः स्पृश्याभ्यवहार्यदोषात् ॥२४॥

तथा शस्त्रप्रभवस्यापि जनपदोद्ध्वंसस्याधर्म एव हेतुर्भवति। येऽतिप्रवृद्धलोभरोषमोहमानास्ते दुर्बलानवमत्यात्मस्वजनपरोपघाताय शस्त्रेण परस्परमभिक्रामन्ति, परान्वाऽभिक्रामन्ति, परैर्वाऽभिक्राम्यन्ते ॥ २५ ॥

रक्षोगणादिभिर्वा विविधैर्भूतसंघैस्तमधर्ममन्यद्वाऽप्यपचारान्तरमुपलभ्याभिहन्यन्ते ॥ २६ ॥

तथाऽभिशापप्रभवस्याप्यधर्म एव हेतुर्भवति, ये लुप्तधर्माणो धर्मादपेतास्ते गुरुवृद्धसिद्धर्षिपूज्यानवमत्याहितान्याचरन्ति, ततस्ताः प्रजा गुर्वादिभिरभिशप्ता भस्मतामुपयान्ति प्रागेवानेकपुरुषकुलविनाशाय, नियतप्रत्ययोपलम्भान्नियताः, अनियतप्रत्ययोपलम्भादनियताश्चापरे ॥ २७ ॥

प्रागपि चाधर्मादृते नाशुभोत्पत्तिरन्यतोऽभूत्। आदिकाले ह्यदितिसुतसमौजसोऽतिविमलविपुलप्रभावाः प्रत्यक्षदेवदेवर्षिधर्मयज्ञविधिविधानाः शैलेन्द्रसारसंहतस्थिरशरीराः प्रसन्नवर्ण-

न्द्रियाः पवनसमबलजवपराक्रमाश्चारुस्फिचोऽभिरूपप्रमाणाकृतिप्रसादोपचयवन्तः सत्यार्जवानृशंस्यदानदमनियमतपउपवासब्रह्मचर्यव्रतपरा व्यपगतभयरागद्वेषमोहलोभक्रोधशोकमानरोगनिद्रातन्द्राश्रमक्लमालस्यपरिग्रहाश्च पुरुषा बभूवुरमितायुषः, तेषामुदारसत्त्वगुणकर्मणामचिन्त्यरसवीर्यविपाकप्रभावगुणसमुदितानि प्रादुर्बभूवुः सस्यानि सर्वगुणसमुदितत्वात्पृथिव्यादीनां कृतयुगस्यादौ । भ्रश्यति तु कृतयुगे केषांचिदत्यादानात्सांपन्निकानां शरीरगौरवमासीत्, शरीरगौरवात् श्रमः, श्रमादालस्यं, आलस्यात् संचयः, संचयात् परिग्रहः परिग्रहाल्लोभः प्रादुर्भूतः ॥ २८ ॥ ततस्त्रेतायां, लोभादभिद्रोहः अभिद्रोहादनृतवचनं, अनृतवचनात्कामक्रोधमानद्वेषपारुष्याभिघातभयतापशोकचित्तोद्वेगादयः प्रवृत्ताः, ततस्त्रेतायां धर्मपादोऽन्तर्धानमगमत्, तस्यान्तर्धानात् ( युगवर्षप्रमाणस्य पादह्रासः ) पृथिव्यादीनां गुणपादप्रणाशोऽभूत्, तत्प्रणाशकृतश्च सस्यानां स्नेहवैमल्यरसवीर्यविपाकप्रभावगुणपादभ्रंशः, ततस्तानि प्रजाशरीराणि हीनगुणपादैश्चाहारविहारैरयथापूर्वमुपष्टभ्यमानान्यग्निमारुतपरीतानि प्राग्व्याधिभिर्ज्वरादिभिराक्रान्तानि, अतः प्राणिनो ह्रासमवापुरायुषः क्रमश इति ॥२९॥

भवतश्चात्र

युगे युगे धर्मपादः क्रमेणानेन हीयते ।
गुणपादश्च भूतानामेवं लोकः प्रलीयते ॥३०॥
संवत्सरशते*पूर्णे याति संवत्सरः क्षयम् ।
देहिनामायुषः काले यत्र यन्मानमिष्यते ॥३१॥

---

* संवत्सराणां शते शतकृत्वो विभक्तानामेकैकभागे संपूर्णे जाते तद्युगोत्पन्नानां देहिनां तत्तत्परिमितस्यायुष एकैकः संवत्सरः क्षयं याति' गङ्गाधरः ।

इति विकाराणां प्रागुत्पत्तिहेतुरुक्तो भवति ॥३२॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच—किं नु खलु भगवन् ! नियतकालप्रमाणमायुः सर्वं न वेति ॥३३॥

भगवानुवाच—

इहाग्निवेश ! भूतानामायुर्युक्तिमपेक्षते ॥३४॥
दैवे पुरुषकारे च स्थितं ह्यस्य बलाबलम् ।
दैवमात्मकृतं विद्यात्कर्म यत्पौर्वदेहिकम् ॥३५॥
स्मृतः पुरुषकारस्तु क्रियते यदिहापरम् ।
बलाबलविशेषोऽस्ति तयोरपि च कर्मणोः ॥३६॥
दृष्टं हि त्रिविधं कर्म हीनं मध्यममुत्तमम् ।
तयोरुदारयोर्युक्तिर्दीर्घस्य च सुखस्य च ॥३७॥
नियतस्यायुषो हेतुर्विपरीतस्य चेतरा ।
मध्यमा मध्यमस्येष्टा, कारणं शृणु चापरम् ॥३८॥
दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते ।
दैवेन चेतरत्कर्म विशिष्टेनोपहन्यते ॥३९॥
दृष्ट्वा यदेके मन्यन्ते नियतं मानमायुषः ।
कर्म किंचित्क्वचित्काले विपाके नियतं महत् ।
किंचित्त्वकालनियतं प्रत्ययैः‡प्रतिबोध्यते ॥४०॥ इति ।

तस्मादुभयदृष्टत्वादेकान्तग्रहणमसाधु, निदर्शनमपि चात्रोदाहरिष्यामः—यदि हि नियतकालप्रमाणमायुः सर्वं स्यात्, तदायुष्कामाणां न मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनाद्याः क्रिया इष्टयश्च प्रयुज्येरन्, नोद्भ्रान्तचण्डचपलगोगजोष्ट्रखरतुरगमहिषादयः पवनादयश्च दुष्टाः परिहार्याः स्युः, न प्रपातगिरिविषमदुर्गाम्बुवेगाः,

‡ दुष्ट कारणैरुद्रिक्तं क्रियते चक्रः ।

तथा न प्रमत्तोन्मत्तोद्भ्रान्तचण्डचपलमोहलोभाकुलमतयः, नारयः, न प्रवृद्धोऽग्निः, न च विविधविषाश्रयाः सरीसृपोरगादयः, न साहसं, नादेशकालचर्या, न नरेन्द्रप्रकोपः, इत्येवमादयो भावा नाभावकराः स्युः, आयुषः सर्वस्य नियतकालप्रमाणत्वात् न चानभ्यस्ताकालमरणभयनिवारकाणामकालमरणभयमागच्छेत्प्राणिनां, व्यर्थाश्चारम्भकथाप्रयोगबुद्धयः स्युर्महर्षीणां रसायनाधिकारे, नापीन्द्रो नियतायुषं शत्रुं वज्रेणाभिहन्यात्, नाश्विनावार्तं भेषजेनोपपादयेतां, न महर्षयो यथेष्टमायुस्तपसा प्राप्नुयुः, न च विदितवेदितव्या महर्षयःससुरेशा रसायनादीनि सम्यक् पश्येयुरुपदिशेयुराचरेयुर्वा, अपि च सर्वचक्षुषामेतत्परं—यदैन्द्रं चक्षुः, इदं चास्माकं प्रत्यक्षं, यथा—पुरुषसहस्राणामुत्थायोत्थायाहवं कुर्वतामकुर्वतां चातुल्यायुष्ट्वं, तथा जातमात्राणामप्रतीकारात् प्रतीकाराच्च अविषविषप्राशिनांचाप्यतुल्यायुष्ट्वं, न च तुल्यो योगक्षेम उदपानघटानां चित्रघटानां चोत्सीदतां, तस्माद्धितोपचारमूलं जीवितमतो विपर्ययान्मृत्युः, अपि च देशकालात्मगुणविपरीतानां कर्मणामाहारविहाराणां च क्रमोपयोगं सम्यक् सर्वातियोगसंधारणमसंधारणमुदीर्णानां च गतिमतां साहसानां च वर्जनमारोग्यानुवृत्तौ हेतुमुपलभामहे उपदिशामः सम्यक् पश्यामश्चेति ॥ ४१ ॥

अतः परमग्निवेश उवाच—एवं सत्यनियतकालप्रमाणायुषां भगवन्! कथं कालमृत्युरकालमृत्युर्वा भवतीति ॥ ४२ ॥

तमुवाच भगवानात्रेयः—श्रूयतामग्निवेश! यथा—यानसमायुक्तोऽक्षः प्रकृत्यैवाक्षगुणैरुपेतः सर्वगुणोपपन्नो वाह्यमानो यथाकालं स्वप्रमाणक्षयादेवावसानं गच्छेत्, तथाऽऽयुः शरीरोपगतं बलवत्प्रकृत्या यथावदुपचर्यमाणं स्वप्रमाणक्षयादेवावसानं गच्छति, स मृत्युः काले, यथा च स एवाक्षोऽतिभाराधिष्ठितत्वा-

द्विषमपथादक्षचक्रभङ्गाद् वाह्यंवाहकदोषादणिमोक्षात् पर्यसनाद्नुपाङ्गाच्चान्तरा व्यसनमापद्यते, तथाऽऽयुरप्ययथाबलमारम्भादयथाग्न्यभ्यवहरणाद्विषमाभ्यवहरणाद्विषमशरीरन्यासादतिमैथुनादसत्संश्रयादुदीर्णवेगविनिग्रहाद्विधार्यवेगाविधारणाद्भूतविषवाय्वग्न्युपतापादभिघातादाहारप्रतीकारविवर्जनाच्च यावदन्तरा व्यसनमापद्यते स मृत्युरकाले, तथा ज्वरादीनप्यातङ्कान्मिथ्योपचरितानकालमृत्यून् पश्याम इति ॥ ४३ ॥ ( च० वि० अ० ३ )

तथोक्तं महर्षिणा सुश्रुतेनाऽपि—

एकोत्तरं मृत्युशतमथर्वाणः प्रचक्षते ।
तत्रैकः कालसंज्ञस्तु शेषा आगन्तवः स्मृताः ॥
जलमग्निर्विषंशस्त्रं स्त्रियो राजकुलानि च ।
अकालमृत्यवो ह्येते तेभ्यो बिभ्यति पण्डिताः ॥
विष्वग्वातादिभि र्यद्वद् दीपो वर्त्यादिसंयुतः ।
निर्वाप्यते क्षणाद् देही तथैवागन्तुमृत्युभिः ॥

इति

## रोगारम्भक्षणे जनानां कर्तव्यम्

प्राज्ञो रोगे समुत्पन्ने बाह्येनाभ्यन्तरेण वा ।
कर्मणा लभते शर्म शस्त्रोपक्रमणेन वा ॥
बालस्तु खलु मोहाद्वा प्रमादाद्वा न बुध्यते ।
उत्पद्यमानं प्रथमं रोगं शत्रुमिवाबुधः ॥
अणुर्हि प्रथमं भूत्वा रोगः पश्चाद्विवर्धते ।
स जातमूलो मुष्णाति बलमायुश्च दुर्मतेः ॥
न मूढो लभते संज्ञां तावद्यावन्न पीड्यते ।
पीडितस्तु मतिं पश्चात्कुरुते व्याधिनिग्रहे ॥
अथ पुत्रांश्च दारांश्च ज्ञातींश्चाहूय भाषते ।
सर्वस्वेनापि मे कश्चिद् भिषगानीयतामिति ॥

तथाविधं च कः शक्तो दुर्बलं व्याधिपीडितम् ।
कृशं क्षीणेन्द्रियं दीनं परित्रातुं गतायुषम् ॥
स त्रातारमनासाद्य बालस्त्यजति जीवितम् ।
गोधा लाङ्गूलबद्धेवाकृष्यमाणा बलीयसा ॥
तस्मात्प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा ।
भेषजैः प्रतिकुर्वीत य इच्छेत्सुखमात्मनः ॥

(च० सू० अ० १२)

## अन्त्येष्टिकर्म

संसारे मनुष्यजातिष्वनेकमतानि प्रचलन्ति । स्वस्वमतानुसारेणान्त्येष्टिकर्मणो रीतिरपि भिन्नैवास्ति । केचित् पारसीकाः जालिकामयोच्चगृहवितानोपरि शवं संरक्ष्य सूर्यप्रकाशेन संशोषयन्ति । तस्य किंचित्तत्वं वाष्पं भूत्वा निर्गच्छत्यवशिष्टमधस्तले पतति । मिश्रदेशवासिनो लवणादिपूरितमंजूषायां रक्षन्ति । यवनाः तथा ईशायिनः पृथिव्यां पाटयन्ति । हिन्दूजनाश्च शवस्य दाहकर्म्म कुर्वन्ति, जले वा प्रवाहयन्ति ।

यद्यपि स्वस्वमतानुसारेण सर्वं युक्तमेव परन्तु स्वास्थ्यदृष्ट्या दाहकर्मैव श्रेष्ठतम उपायः । यतः पारसीकविधौ दौर्गन्ध्यं वर्धते । मिश्रीयविधौ शवरक्षणान्नकश्चिल्लाभः प्रत्युत लवणादिव्ययाधिक्यं तथा व्यर्थं स्थानमप्यावृतं भवति । यवनेशायिविधौ तु शनैः शनैः सर्वमेव स्थानं समाधिमयं जायते । तथा तद्द्वारा वायुर्दूषितो भवति, तत्समीपस्थकूपादेर्जलमपि दुष्यति, येन स्वास्थ्यहानिरनेके च रोगा उत्पद्यन्ते । परन्तु हिन्दूविधौ, दाहकर्मणा तत्क्षणमेव सर्वाणि तत्वानि स्वस्मिन् स्वस्मिन् गत्वा मिलन्ति । न कश्चिद् दोषः समुत्पद्यते । किंतु असम्यग्दहने दुर्गन्धिवाष्पं निर्गत्य वायुंदूषयत्यतो न्यूनातिन्यूनमष्टमणपरिमितसमिध

उपयोग एकशवदाहार्थं कार्यः। सुगभीरजले शवनिमज्जनमपि हितकरं, परन्त्वयमुपायः सर्वत्र न कर्तुं शक्यः।

समाधेः स्थानं तु वसतेः क्रोशार्धदूरे ततो निम्नस्थले कार्यम्। यतस्तद्वसतेर्जलं वायुं च दूषयितुं न शक्नुयात्। समाधयः पृथक्पृथक् किञ्चिद्दूरे दूरे स्युः। तत्र वृक्षा अप्यारोपणीयाः शवा गभीरखाते पाटनीया यतस्तदवयवा वाष्पद्वारा निर्गत्य स्वास्थ्यहानिकारका न भवेयुः। एकसमाधावेक एव शवःपाटनीयः। परन्तु युद्धे तु नैवं कर्तुंशक्यते स्थानकालाद्यभावात्। अतस्तत्र १०—१२ हस्तगभीरं खातं सुदीर्घं खन्यते। तत्रोभय पङ्क्तौ शवाः संरक्ष्यन्ते। तदुपरि चूर्णं ( चूना ) प्रक्षिप्य क्रमशः पुनस्तथैव संरक्ष्यन्ते। यदा हस्तचतुष्टयं गाम्भीर्यमुपरि रिक्तं तिष्ठति तदा तत्र मृत्तिकाः प्रक्षिप्य खातं प्रपूर्यत इति।

## स्वस्थवृत्तानुष्ठानस्य फलम्

स्वस्थवृत्तं यथोद्दिष्टं यःसम्यगनुतिष्ठति।
स समाः शतमव्याधिरायुषा न वियुज्यते ॥
नृलोकमापूरयते यशसा साधुसम्मतः।
धर्मार्थावेति भूतानां बन्धुतामुपगच्छति ॥
परान् सुकृतिनो लोकान् पुण्यकर्मा प्रपद्यते।
तस्माद्वृत्तमनुष्ठेयमिदं सर्वेण सर्वदा ॥

( च० सू० अ० ८ )

## ग्रन्थसमाप्तिकालः

रिपुवसुनिधिचन्द्रैरङ्किते वैक्रमेऽब्दे
बुधदिनशिवरात्रौ फाल्गुने कृष्णपक्षे।
सकलकृतिरियं मे पूर्णतां सङ्गताद्य
बुधजनहृदयानां ह्लादकर्त्री प्रभूयात् ॥

# ग्रन्थकर्तुः परिचयः

गोण्डामण्डलसंस्थिता सुविदिता प्रान्तेऽवधे मञ्जुले
आटाख्या नगरी विचक्षणजनैर्लब्धास्पदा राजते ।
नानाशास्त्रविचारदक्षमतिभिः श्रौताध्वपारंगतैः
धर्मध्यानविधानयापितदिनैः सत्वप्रकर्षाश्रितैः ॥

तस्यां शास्ता सकलभुवनख्यातकीर्तिर्महीन्द्रः
वीर्योन्माद्यद्रिपुदलशिरोरत्नभाभूषिताङ्घ्रिः ।
न्यायोन्मीलन्नवनवगुणो मोदकारी जनानां
नारीचूडामणिकमलया जाययाऽलंकृतोऽस्ति ॥

श्रीकमलाकमनीयसुकान्तः
लोकविलोचनचोरचकोरः ।
कान्तिकलाधनधैर्यनिधानं
भाति सुरेन्द्रबहादुरसिंहः ॥

तत्रासीद्विप्रवर्य्यः सकलबुधजनैः कीर्तनीयः सभायां
भूपेभ्यो लब्धमानो विहितपरिचयः शब्दतर्कादिशास्त्रे ।
कीर्तिश्रीभारतीभिस्तिसृभिरतिशयं वेष्टितः सानुरागं
मिश्रोपाह्वः सुधीरामफलतनुजनिःपण्डितो रामनाथः ॥

तज्ज्येष्ठपुत्रोऽनुज चन्द्रिकाख्य,
दैवज्ञ वर्य्यो मग वंश जातः ।
श्रेष्ठः सदाचाररतोऽस्ति विप्रः,
शास्त्रीति राजेश्वरदत्तमिश्रः ॥

संरक्षिताखिलसुगौरवभारतीयैः ।
पूज्यैर्बुधैर्मदनमोहनमालवीयैः ॥
संस्थापितेऽत्र भवने निखिलागमानां ।
विद्यालये प्रथमविश्वपदाभिधेये ॥

IGNCA RAR
ACC. No. R-354

आयुर्वेदपयोनिधेर्मतिमतो विद्यालयाध्यक्षतो
नव्योद्यत्कविराजराजपदवीसम्भूषितात्सद्गुरोः ।
विद्यावृद्धिपरोपकारनिरताच्छ्रीधर्मदासाद् बुधाद्
ग्रन्थानां पठनं समाप्य निखिलं तीर्णः परीक्षोदधिः ॥
आयुर्वेदे वरिष्ठां सकनकपदकां प्राप्य लोकप्रशस्या-
माचार्यश्रेणिमुच्चां सकलजनमनोमोदहेतुं नितान्तम् ।
सद्यस्तत्रैव भागे गुरुजनहृदयानुग्रहाल्लब्धकार्यो
ग्रन्थं भद्रंन्यबध्नात् सरलविधितया बोधदं सज्जनानाम् ॥
पाठ्येनिर्धारितः सोऽस्ति स्वस्थवृत्तसमुच्चयः ।
लोकानामुपकाराय यथानामतथागुणः ॥
इदानीं पाठयत्यत्र विश्व-विद्यालये वसन् ।
चिकित्सा क्रियते काश्यां सर्वेषां रोगिणामपि ॥
सदस्यो राजकीयायाः सभायाः भेषजस्य च ।
युक्त प्रान्त प्रतिष्ठाया वर्त्ततेऽयं महोदयः ॥
युक्त प्रान्तीय वैद्यानांमेलने दशमे तथा ।
अध्यक्षो ह्यभवत्तस्यां प्रशस्तो वैद्यराडयम् ।

तारांशंकर मिश्र, आयुर्वेदाचार्य,
अध्यापक—अर्जुन आयुर्वेद विद्यालय, काशी ।

समाप्तः

Printed at the Arya Bhushan Press,
Brahmaghat, Benares.

Indira Gandhi National
Centre for the Arts